॥ अथ श्रीमन्न्यायसुधापरिमळेचतुर्थाध्यायप्रारंभः ॥

श्रीगुरुभ्योनमः ॥हरिःॐ ॥ आराधितःसाधनैर्योमुक्तिंदद्याच्चतुर्विधां । तंवंदेकमलानाथमभीष्टावा(प्तयेहरिं ॥)प्तसिद्धये ॥
मंगलमाचरति ॥ [६।३।१]यदीयेति । निर्वृताःमुक्तक्लेशाः । नंदंतिसुखमनुभवंति । मुक्ताःचतुर्विधमुक्तिमंतः । यद्वानिर्वृताः
क्षीणकर्माणः । मुक्ताःदेहबंधादितिपादद्वयार्थः । यदीयेत्यादिस्तृतीयपादार्थः । नंदंतीतिचतुर्थपादार्थः । प्रतिपाद्यमनु
क्त्वासंगत्युक्तिरनवसरदुःस्थेत्यतआह ॥ फलमिति ॥ [६।३।३]परंब्रह्मादीति । आदिपदेनाधिदैवाधिभूतादिग्रहः । साधनइत्य
ध्यायपरमेतदित्याह ॥ साधनेसाधनविषयइति । विषयसप्तमीयमित्युक्तंभवति । अवसरप्राप्तंव्यनक्ति ॥ [६।३।४]जिज्ञासिते
ष्विति । प्रथमसूत्रेजिज्ञासाविषयतयोक्तेषुब्रह्मलक्षणप्रमाणसाधनमोक्षेष्वित्यर्थः ॥ [६।३।५]संगतिमिति । पादानामितियोज्यं ॥
वक्ष्यतीति । द्वितीयपादे ॥ ॐ[६।३।१०]आवृत्तिरसकृदुपदेशात्ॐ ॥ [६।३।११]उत्थानकारणमिति । अवतारिकारूपंसूत्रव्यावर्त्यसं
शयादिकंदर्शयतीत्यर्थः ॥ इतिवर्ततइति । पूर्वं तत्रेत्यस्यचतुर्थाध्यायेप्रथमपादइति प्रथममित्यस्यतदधिगमइत्यर्थतःपू
र्वैकैश्चित्सूत्रैरितिव्याख्यानात् इहचसाधनविचाररूपसूत्रेषुप्रथममित्यर्थकतयापदद्वयमावर्तनीयमित्यर्थः । श्रुत्यर्थनिर्णायकत्व
लाभायाह ॥ श्रोतव्यइत्यादिविधीयतइत्यंतं । ज्योतिष्टोमादिदृष्टांतोक्त्योभयविधसाधनदर्शनंसंशयबीजमुक्तंभवति ॥
[६।३।१३]न्यायविवरणइति । श्रवणाद्यनावृत्त्याऽपरोक्षज्ञानोदयेसर्वेषांसुशकत्वमितिगुणइत्युक्तसु(खकरत्वयुक्तिरित्य)शकत्वयुक्ति ॥४६४॥
रित्यर्थः । तद्विवरणंचभाष्यटीकायामित्यर्थः ॥ इतिवर्ततइतिबुद्ध्याविभज्यविपरिणम्यवर्ततइत्यर्थः । लातव्यइत्यनुवादः ।

आदातव्यइतिव्याख्या । लाआदानइतिधातोरितिभावः । उपासितव्यइतिफलितोक्तिः ॥ [६।४।४]ऋजोर्विशेषणमिति । ब्रह्म त्वानांशतात्पूर्वविद्यमानोयोब्रह्मपदयोग्यःऋजुः(लातव्यइतिनाम)तस्मात् शुश्रावरुद्रपदयोग्यइत्येवमर्थइतिभावः ॥ अंत्यं [६।४।५]संयोगइति । कालाध्वनोरत्यंतसंयोगइतिसूत्रंअत्यंतसंयोगविषयेद्वितीयाभवतीत्यर्थः । तथाचसार्धपरार्धंब्रह्मणःपंचसप्तति वर्षमध्येएकदिनमपिश्रवणमकृत्वाप्रतिदिनंशुश्रावेत्यर्थः । पदविशेषणत्वाप्रतीतेराह ॥ [६।४।७]गरुत्मतोयत्पदमिति । नित्यसा पेक्षत्वात्समासइतिभावः । एवमव्याख्यानेहिपदेत्यस्यकस्यपदेत्याकांक्षानशांतास्यादितिज्ञेयं ॥ [६।४।८]द्विविकरणतेति । श्रुश्रवण इत्यस्यश्नुविकरणेकृतेपश्चात्तुदादिभ्यश्शइत्युक्तशविकरणमपिकार्यं। पश्चाद्यणादेशेऽश्रृण्वतामितिछांदसंरूपमित्यर्थः शब्विक रणेहिगुणावादेशौप्राप्नुतः॥ [६।४।९]वर्णविकारइति । ह्रस्वरूपोविकारइत्यर्थः ॥ [६।४।११]ईत्यनेनैवगतमिति । तत्रैकत्रोक्तगुणानांकेषां चिच्छाखांतरेपिश्रवणादेकस्यामपिकेषांचित्पुनःपुनःश्रवणादितिभावः ॥ ६ ॥ ४ । १ । १ ॥ ६॥ [६।४।१२]आत्मेति ॥ [६।४।१३]व्याख्या तुमिति । तस्मादुपास्यइत्यादिनेतिज्ञेयं । हिशब्दार्थोयस्मादिति । ईयतइत्यस्यकर्त्राकांक्षांपूरयितुंश्रीपतिरित्यतः पूर्वशेषमाह ॥ [६।४।१५]इतिनामभिरिति । प्रथमांतस्यान्वयंशेषेणाह ॥ पैंगिश्रुतिरिति ॥ [६।४।१६]श्रुत्यंतरेति । वक्ष्यमाणे तियोज्यं ॥ इत्यादिविरोधइति । जीवपर्यायत्वोक्तिपरामरकोशादिविरोधोनशंकनीयइत्यर्थः । अपौनरुक्त्यायाया ह ॥ [६।४।१७]इतिसमस्तमेकंनामेति । सप्तम्यंतस्यान्वयंशेषोक्त्याह ॥ [६।४।१८]प्रयोगोस्तीति ॥ तत्रप्रकृतेनेति । चतु र्थस्कंधेप्रथमेध्याये याःकर्दमसुताःप्रोक्ताआसन्ब्रह्मर्षिपत्नयः । इत्युपक्रम्यपत्नीमरीचेस्तुकलासुषुवेकर्दमात्मजेत्यादिनाप्रकृते

नेत्यर्थः । षष्ठाध्यायबृहद्भाष्योक्तिंहृदिकृत्वाह ॥ अंतर्णीतणिजर्थोत्रजनिरिति । सोमस्यब्रह्मानंशत्वात्संपदस्यस
हार्थत्वमुपेत्यसंभवपदंतदनुगुणतयाव्याचष्टे ॥ संहरंभवंतीति ॥ सोमोब्रह्मणेति । ब्रह्मणोनावतारोस्तिसन्नि
धानंतुकेवलमित्यादितत्तात्पर्योक्तेरितिभावः ॥ तद्धर्मइति । सहभावरूपोधर्मइत्यर्थः ॥ प्रतिज्ञांशमिति । आत्मेत्यंशमि
त्यर्थः । मूलंव्यत्यासेनयोजयति ॥ ज्ञातव्यइति ॥ ध्येयश्चेति । सूत्रेशेषोक्तिरियं ॥ हेत्वंशमिति । उपगच्छंतीत्याद्यं
शं ॥ अतोमनिन्निति । आतोमनिन्क्वनिब्वनिपश्चेतिसूत्रेणेत्यर्थः । आकारलोपेतकारौकेनेत्यतोनिरुक्तिरूपप्रमाणादिति
भावेनाह ॥ निर्वचनादिति ॥ यच्चेति । यच्चाप्नोतियदायत्तेयच्चात्तिविषयानिह । यच्चास्यसंततोभावस्तस्मादात्मेतिभण्य
तेइतिवाक्यशेषः ॥ आधिर्व्याधीति । आधिर्मानसीव्यथा । व्याधिर्ज्वरादिदेहपीडा ॥ परंउपरितनमिति । अनुपदमु
दाहरिष्यमाणमित्यर्थः ॥ ७ ॥४ । १ । २ ॥७॥ ॐनप्रतीकेनहिसःॐ । व्याख्यानेबीजमाह ॥ तत्रप्रतीकइति । अन्य
थाप्रतिपत्तिप्रदर्शनायैवप्रागधिकरणप्रतिपाद्योक्तिः । कर्त्राद्यर्थत्वायोगादाह ॥ इत्थंभूतलक्षणेतृतीयेति । प्रतीकविषय
त्वप्रकारंप्राप्ताभावनेतीयंतृतीया भावनायांप्रतीकविषयत्वप्रकारप्राप्तिंलक्षयतिज्ञापयतीत्यर्थः । तद्दर्शयति ॥ इदमित्या
दि । ननुविष्णोर्मनआदिनीचरूपत्वेनध्यानस्यदोषकृत्त्वेपिमनःप्रभृतेरुत्कृष्टब्रह्मत्वध्यानंनदोषकृदित्यतआह ॥ वक्ष्यमाणे ॥४६९॥
ति । चंडालोनृपइत्युक्तेनृपश्चंडालइत्यपि । कोविशेषइत्यादिनावक्ष्यमाणेत्यर्थः । ननूक्तवचनेषुक्वचिदन्यथाज्ञाननिषेधःक्व

चिद्ध्यानस्यकुतएवंसंकरोक्तिःध्याननिरासस्यैवप्रस्तावादित्यतआह ॥ ध्यानस्यापीति । पाणिनीयंसूत्रमाह ॥ व्यत्ययोब
हुलमिति । सप्तसुप्रथमायस्माद्भूयोभूयस्त्वतस्तथा । षट्सुद्वितीयायस्माच्चेदित्यादिछांदोग्यभाष्यंहृदिकृत्वाह ॥ सप्तस्वि
ति । वाचंब्रह्मेत्येतन्निर्वाहायाह ॥ षट्स्विति । द्वितीयादिविभक्तिष्वित्यर्थः । आदिपदेनसुपांसुलुगित्यादिग्रहः ॥
विभक्तिव्यत्ययेनेति । नामादिप्राणपर्यंताःसप्तम्यर्थाःप्रकीर्तिताइतिसप्तमेछांदोग्यभाष्योक्तिरितिभावः ॥७॥४।१।३॥७॥
ॐब्रह्मदृष्टिरुत्कर्षात्ॐ ॥ तच्चयोग्यताविरहान्निराकृतमिति । प्रतीकंब्रह्मेत्येतच्चाभेदस्यबाधेनमिथ्योपास्तेर्निरासा
न्निराकृतमित्यर्थः। उपलक्षणमेतत्। प्रतीकेब्रह्मेत्युपास्तेर्योग्यत्वेपिपूर्वेणगतत्वान्नायमप्यर्थइत्यपिध्येयं॥ योग्यतयान्वयइति।
आनंतर्यमचोदनेतिजैमिनिसूत्रेयोग्यतैवबलीयसीत्युक्तेः । व्यवधानेनान्वयोपियोग्यतापेक्षयाभवेदितिचतुर्थस्कंधैकविंशाध्या
येतात्पर्योक्तेश्चेतिभावः ॥ अन्येभ्योपीति । विवृतमेतदस्माभिर्जिज्ञासासूत्रे ॥ दृशिग्रहणेति । दृशिग्रहणंप्रयोगानुसा
रार्थइतिवृत्तावुक्तेः ॥ हेतुहेतुमद्भावश्चेति । ब्रह्मशब्दार्थस्योकृष्टतयातथोपास्तेतरन्योपास्त्यपेक्षयोत्कर्षात्ब्रह्मत्वोपा
स्तिस्सर्वथाकार्येत्येवंरूपेण महत्ववाचिशब्दोयमितिस्मृत्युक्त्यासमर्थितइत्यर्थः । निमित्तेनेत्येकवचनश्रवणादाह ॥ द्वंद्वैक
वद्भावइति । कर्तृकरणयोस्तृतीयेतिविक्षिप्तमनसेतिकर्तरितृतीययाभाव्यमित्यतआह ॥ कृत्यानामिति । कृत्याःप्राङ्ण्वु
लइतिसूत्रोक्तकृत्यसंज्ञकप्रत्ययानांयोगेकर्त्रर्थेविकल्पेनषष्ठीभवतीतिद्वितीयाध्यायतृतीयपादस्थसूत्रस्यार्थः । इहचयत्प्रत्ययां
तध्येयेत्यस्यकृत्यप्रत्ययांतत्वादितिभावः ॥ भाष्योदाहृतानीति । अत्रसूत्रेएकस्यैववचनस्योक्तावपिआत्मेत्यादिसूत्रो

परिमळ० क्तवचनांतरापेक्षयावचनानीत्युक्तं ॥ ७ ॥ ४ । १ । ४ ॥ ७ ॥ [६१६।११] एकेइति । अद्वैतिनःइत्यर्थयथाश्रुतपरंभाष्यमनुवदति॥ अ.४पा.१
॥३॥ परमात्माकिमहमिति । जीवइतिग्राह्यइत्यर्थः । ईश्वरस्यात्मत्वेआत्मनईश्वरत्वपक्षेचोभयत्रदोषमाह ॥ [६१६।१३] ईश्वरस्येत्या अधि.२
दिना । आद्यपक्षाश्रयेणसिद्धांततावदाह ॥ [६१६।१४] आत्मेत्येवेति । सूत्रशेषस्यार्थमाह ॥ परमेश्वरेति । उपगच्छंतिस्वी
कुर्वंतीत्यर्थः । आत्मत्वोपगमाःआत्मत्वांगीकाराइत्यर्थः ॥ [६१६।१७] इत्यादिकेति । अन्योसावन्योहमस्मीतिनसवेदयथापशु
रितिवाक्यशेषआदिपदार्थः । द्वितीयकल्पमाश्रित्याह ॥ [६१६।१८] नहीति । दोषद्वयस्योत्तरंप्राक्प्रबोधादिति । ब्रह्मज्ञानात्प्रा
गित्यर्थः ॥ ७ ॥ द्वितीयसूत्रव्याख्यानमनुवदति ॥ [६१६।२१] मनोब्रह्मेतीत्यादिनाआत्मग्रहःअहंत्वग्रहइत्यर्थः । प्रती
काभावप्रसंगादित्युक्तंव्यनक्ति ॥ [६१६।२४] विकारस्वरूपेति । नामादिजातस्य नामवागादिसमूहस्य ॥ ७ ॥ तृतीयसूत्रव्या
ख्यानमनुवदति ॥ [६१७।१] तेष्वेवेति । मनोब्रह्मेत्यादिप्रागुक्तेष्वित्यर्थः । आदित्योब्रह्मेत्यादेशइत्यादेरपितत्रश्रवणादिति
भावः । लौकिकन्यायइत्युक्तंव्यनक्ति ॥ [६१७।१४] क्षत्तरीति ॥ विपर्ययइति । उत्तमेनीचदृष्टिकरणइत्यर्थः । अपव्याख्यानानुवादः
॥ ७ ॥ ननुपूर्वसूत्रार्थानुवादवेलायांआत्मेत्येवेश्वरःप्रतिपत्तव्यइत्युक्त्यातथादृष्टिमात्रमेव नत्वीशस्यजीवत्वंवास्तवमितिईश
स्यजीवत्वेनदृष्टिमात्रप्रतिपादकंसूत्रमितिभाति । इहतूच्यतेईश्वरस्य(वास्तव)जीवत्वप्रतिपादकमिति तत्कथमित्यतआह ॥ ॥४६६॥
[६१७।१७] अत्रप्रतिपत्तिरिति । प्रतिपत्तव्यपदोक्तेत्यर्थः । अभिमतेतिकथंज्ञायतइत्यतआह ॥ प्रतीकेति । परभाष्येविरुद्धगुणयो

र्जीवेशयोरभेदोनयुक्तः इत्युक्त्वातर्ह्यभेदोपदेशपरवाक्यानांकागतिरितिशंकित्वाब्रह्मतादात्म्येननामादिप्रतीकदर्शनंकार्यमित्ये तत्परोयमभेदोपदेशइतिपूर्वपक्षयित्वा तथात्वेऽभेदोपदेशस्यगौणत्वप्रसंगादित्यादिनानिराकृतं । तेनज्ञायतेप्रतीकदृष्टिनि रासादीश्वरएवजीवत्वप्रतिपत्तिःप्रमितिरभिमतेति । तथाचजीवेशयोरभेदोयथार्थएवप्राप्तः नतथादृष्टिमात्रमितिप्रतिपत्तव्य त्वप्रतिपादकमितिजीवत्वप्रतिपादकमितिचएकत्वएवार्थस्संपन्नइत्यर्थः । एवकारद्वयस्याप्यन्वयंदर्शयन्योजनामाह ॥ [६१७।१]स्वश ब्दादेवेति । कथमेतावतात्मपदार्थोजीवोनेत्यत्रकिमुक्तंभवति जीवनिरासेचतत्रकाप्रसक्तिरित्यतआह ॥ [६१७।१०]एतदुक्तमिति । यद्यपिपरभाष्येवायुकोटिरप्युक्तातथापितस्यप्रकृतानुपयोगात्कोटित्रयमेवानुवदति ॥ [६१७।१२]प्रधानंमुच्यतइत्यादिना । (सइत्येत त्)सूत्रकारपरतयापूर्वव्याख्यायशब्दपरतयाव्याचष्टे ॥ [६१७।१८]अर्थवेति ॥ [६१७।१९]अत्रेति । आत्मशब्दार्थोविष्णुरेवेत्यत्रेत्यर्थः । नवदंतीत्यत्रकर्माकांक्षायामाह ॥ अन्यानिति । शेषोक्त्यावाक्यंयोजयति ॥ कुतइत्यादिना । तैरित्यस्यार्थोऽन्यैरिति ॥ [६१८।४]प्रागपीति । पूर्वपादद्वयेभेदव्यपदेशाच्चान्यः । शारीरश्चोभयेपिहिभेदेनैनमधीयते । विशेषणभेदव्यपदेशाभ्यांचनेतरावि तिसूत्रैरित्यर्थः ॥ अत्रापीति । द्युभ्वाद्यधिकरणेपिस्वशब्दमुक्तोपसृप्यत्वावस्थित्यदनरूपविरुद्धधर्माधिकरणत्वानामनेक प्रमाणानामुक्तेःसतात्पर्यमुक्तमित्युक्तमित्यर्थः । मूलमवतारयति ॥ [६१८।५]नैकोपीति ॥ तानीति । त्रिपाद्यामुक्तानि । इदं त्विति । आत्मेतीतिसूत्रमित्यर्थः । व्यावहारिकशब्देनव्यवहारसिद्धत्वोक्तौसत्यत्वप्राप्त्याग्रेतनमूलघटनायोगादाह ॥ अ [६१८।६]त्रव्यावहारिकशब्देनेति । कथमेवमभिप्रायोज्ञायतेइत्यतआह ॥ प्राक्प्रबोधादिति । परभाष्येसिद्धांतेजीवेशयोरेक

त्वेसंसार्यभावंप्रत्यक्षविरोधंचपूर्वपक्ष्युक्तमनूद्यप्रबोधात्प्राक्संसारिसत्वाभ्युपगमादित्युक्त्याभ्रांतिसिद्धइत्यवगम्यते । तदनु वादत्वान्मूलस्येत्यर्थः । सृष्ट्यादौकथमित्यतआह ॥ [६१८।११] अनादिश्चेति ॥ [६१८।१२] सोपपत्तिकमिति । तृतीयकल्पावकाशोयथाना स्तितथाविकल्पकरणात्सोपपत्तिकमित्युक्तं । यद्वाव्यावहारिकशब्दार्थमपृष्ट्वातत्तद्रूपविकल्पकरणात्सोपपत्तिकमित्युक्तं ॥ [६१८।१३] इतिशेषइति । भेदमात्रंव्यावहारिकंइतिवचनमित्यर्थः ॥ अन्यदिति । प्रमाणोपन्यासादीत्यर्थः ॥ अन्य इति । भेदांतरसत्त्वोपपादनादित्यर्थः । यश्चेत्यस्यभेदइतिदूरेणान्वयः ॥ [६१८।१७] पदार्थानामसत्वेति । सर्वोपिभेदोभ्रांतिक ल्पितइतिवाक्यगतानियानिपदानितदर्थानामसत्त्वेइत्यर्थः ॥ वाक्यार्थसत्यत्वेति । पदार्थसंसर्गातिरिक्तवाक्यार्थस्याभावा दितिभावः ॥ [६१८।२०] उभयथापीति । भेदमात्रंभ्रांतिसिद्धमितिवाक्यार्थस्यभ्रांतिसिद्धत्वाभ्रांतिसिद्धत्वपक्षद्वयेपिभेद मात्रंभ्रांतिसिद्धमितिवाक्यार्थोनुपपन्नइत्यर्थः ॥ [६१८।२४] असमर्थेति । व्याप्त्युपपादनासमर्थेत्यर्थः । व्याप्तिप्रकारंनिष्कृष्यद र्शयति ॥ यःपदार्थइति । वचनमात्रस्याभासत्वेनाप्युपपत्त्याप्रकृतार्थानिर्वाहकत्वादाह ॥ [६१९।१] इत्युक्तइतीति । यद्वाआप्तोक्त मसत्यंनेत्यनुमितेपिसत्यमुक्तमितिजानंत्येवातःकथंवचनग्रहणमित्यतआह ॥ इत्युक्तइति ॥ आविपालांगनमिति । आ अविपालांगनाभ्यःअविपालांगनापर्यंतमित्यर्थः । आङ्मर्यादाभिविध्योरित्यव्ययीभावः ॥ [६१९।५] प्रतिवाद्युच्यतइति । अस्मत्प्रतिवा दीमायावादीत्यर्थः । अत्रप्रकरणेवचनशब्दःतदर्थइत्युक्तत्वात् । तद्वागर्थस्यसकलभेदमिथ्यात्वस्येत्युक्तं । मिथ्यात्वेअसतीतिवि भागः अविद्यमानइत्यर्थः । तर्हितत्वमसीत्याद्यभेदश्रुतीनांकागतिरित्यतआह ॥ [६१९।११] श्रुतयस्त्विति ॥ [६१९।१२] प्रागेवेति । पृथगुपदेशादित्य धिकरणे तथापितुचिदानंदपूर्वास्तेसदृशागुणाइत्यादिनाव्याख्याताइत्यर्थः । विरुद्धगुणतायांमिथ्यात्वादितिप्रागुक्तंनिराह ॥ विरुद्धगुणसत्यताचेति । नदुःखानुभवःक्वापिमिथ्यानुभवतांव्रजेदित्यादिनापृथगधिकरणएवोपपादितेत्यर्थः । तद्विषयत्वा च्चप्रत्यक्षादिव्यवहारस्येत्यादिनोक्तंनिराह ॥ प्रत्यक्षादीनामतत्वेति ॥ निराकृतमिति । वेदवेद्यस्यमिथ्यात्वंयदिनैक्यस्यत त्कथंइत्यादिनाततोहिप्रत्यक्षसिद्धंनान्येनकेनचित् । शक्यंवारयितुंक्वापीत्यंतेनभक्तिपादादावितिज्ञेयं ॥ [६१९।१३] समर्थितमिति । मिथ्यात्वंयदिदुःखादेस्तद्वाक्यस्याग्रतोभवेदित्यादिनाजिज्ञासासूत्रइतिभावः ॥७॥ ४।१।२ ॥७॥ [६१९।१४] उक्तन्यायादिति । आत्मश ब्दंयतोहेतुमित्यादिनोक्तन्यायादित्यर्थः । एतावतापरकीयसूत्रार्थेकिंदूषणमुक्तमित्यतआह ॥ [६१९।१६] इदमुक्तंभवतीति । परम तोदोषोक्तिप्रस्तावेसिद्धांतसूत्रार्थोक्तिरसंगतेत्यतआह ॥ मनोब्रह्मेति । यद्वाभवदर्थोप्यकृतस्वीकाररूपएवसूत्रेऽप्रतीतेरित्य तआह ॥ [६१९।१९] मनोब्रह्मेत्यादीति ॥ [६१९।२१] प्रसंगादिति । सूत्रार्थदूषणभूषणप्रसंगादिति । यद्वास्मृतस्योपेक्षानर्हत्वरूप प्रसंगादित्यर्थः ॥ [६१९।२२] शाब्दिकानामिति । सप्तसुप्रथमेतिपठतामित्यर्थः । तथाचश्रुतौनाम्निब्रह्मेत्यादियोजनेतिभावः । ॥ [६१९।२३] प्रतीकेष्विति । विषयसप्तमीयंनत्वाधारसप्तमी । अनेनकःप्रतिज्ञादोषउक्तइत्यतआह ॥ [६१९।२४] अयमर्थइति । प्रसंजकाभा वादिति । नामब्रह्मेत्येवश्रवणेननामात्मेत्यश्रवणादितिभावः ॥ [६१९।२५] प्रमाणविरुद्धमिति । द्वासुपर्णानिर्विकारोक्षरइत्यादिप्र माणविरुद्धमित्यर्थः ॥ [६२०।१] अतिप्रसंगादिति । अंगुल्यग्रेहस्तिशतमित्यादेरपिकेनचिदुक्तस्यनिषेधप्रसंगादित्यर्थः ॥ तस्मादि

त्वेसंसार्यभावंप्रत्यक्षविरोधंचपूर्वपक्ष्युक्तमनूद्यप्रबोधात्प्राक्संसारिसत्वाभ्युपगमादित्युक्त्याभ्रांतिसिद्धइत्यवगम्यते । तदनु
वादत्वान्मूलस्येत्यर्थः । सृष्ट्यादौकथमित्यतआह ॥ अनादिश्चेति ॥ सोपपत्तिकमिति । तृतीयकल्पावकाशोयथाना
स्तितथाविकल्पकरणात्सोपपत्तिकमित्युक्तं । यद्वाव्यावहारिकशब्दार्थमपृष्ट्वातत्तद्रूपविकल्पकरणात्सोपपत्तिकमित्युक्तं ॥
इतिशेषइति । भेदमात्रंव्यावहारिकंइतिवचनमित्यर्थः ॥ अन्यदिति । प्रमाणोपन्यासादीत्यर्थः ॥ अन्य
इति । भेदांतरसत्त्वोपपादनादित्यर्थः । यश्चेत्यस्यभेदइतिदूरेणान्वयः ॥ पदार्थानामसत्वेति । सर्वोपिभेदोभ्रांतिक
ल्पितइतिवाक्यगतानियानिपदानितदर्थानामसत्त्वेइत्यर्थः ॥ वाक्यार्थसत्यत्वेति । पदार्थसंसर्गातिरिक्तवाक्यार्थस्याभावा
दितिभावः ॥ उभयथापीति । भेदमात्रंभ्रांतिसिद्धमितिवाक्यार्थस्यभ्रांतिसिद्धत्वाभ्रांतिसिद्धत्वपक्षद्वयेपिभेद
मात्रंभ्रांतिसिद्धमितिवाक्यार्थोनुपपन्नइत्यर्थः ॥ असमर्थतेति । व्याप्त्युपपादनासमर्थतेत्यर्थः । व्याप्तिप्रकारंनिष्कृष्यद
र्शयति ॥ यःपदार्थइति । वचनमात्रस्याभासत्वेनाप्युपपत्त्याप्रकृतार्थानिर्वाहकत्वादाह॥ इत्युक्तइतीति । यद्वाआप्तोक्त
मसत्यंनेत्यनुमितेपिसत्यमुक्तमितिजानंत्येवातःकथंवचनग्रहणमित्यतआह ॥ इत्युक्तइति ॥ आविपालांगनमिति । आ
अविपालांगनाभ्यःअविपालांगनापर्यंतमित्यर्थः। आङ्मर्यादाभिविध्योरित्यव्ययीभावः॥प्रतिवाद्युच्यतइति। असत्प्रतिवा
दीमायावादीत्यर्थः । अत्रप्रकरणेवचनशब्दःतदर्थइत्युक्तत्वात् । तद्वागर्थस्यसकलभेदमिथ्यात्वस्येत्युक्तं । मिथ्यात्वेअसतीतिवि
भागः अविद्यमानइत्यर्थः। तर्हितत्वमसीत्याद्यभेदश्रुतीनांकागतिरित्यतआह॥ श्रुतयस्त्विति॥ प्रागेवेति। पृथगुपदेशादित्य

धिकरणे तथापितुचिदानंदपूर्वास्तेसदृशागुणाइत्यादिनाव्याख्याताइत्यर्थः । विरुद्धगुणतायांमिथ्यात्वादितिप्रागुक्तंनिराह ॥
विरुद्धगुणसत्यताचेति । नदुःखानुभवःक्वापिमिथ्यानुभवतांव्रजेदित्यादिनापृथगधिकरणएवोपपादितेत्यर्थः । तद्विषयत्वा
च्चप्रत्यक्षादिव्यवहारस्येत्यादिनोक्तंनिराह॥ प्रत्यक्षादीनामतत्वेति ॥ निराकृतमिति । वेदवेद्यस्यमिथ्यात्वंयदिनैक्यस्यत
त्कथंइत्यादिनाततोहिप्रत्यक्षसिद्धंनान्येनकेनचित् । शक्यंवारयितुंक्वापीत्यंतेनभक्तिपादादाविति ज्ञेयं ॥ समर्थितमिति ।
मिथ्यात्वंयदिदुःखादेस्तद्वाक्यस्याग्रतोभवेदित्यादिनाजिज्ञासासूत्रइतिभावः ॥छ॥ ४ । १ । २ ॥छ॥ उक्तन्यायादिति । आत्मश
ब्दंयतोहेतुमित्यादिनोक्तन्यायादित्यर्थः । एतावतापरकीयसूत्रार्थेकिंदूषणमुक्तमित्यतआह ॥ इदमुक्तंभवतीति । परम
तोदोषोक्तिप्रस्तावेसिद्धांतसूत्रार्थोक्तिरसंगतेत्यतआह ॥ मनोब्रह्मेति । यद्वाभवदर्थोप्यकृतस्वीकाररूपएवसूत्रेऽप्रतीतेरित्य
तआह ॥ मनोब्रह्मेत्यादीति ॥ प्रसंगादिति । सूत्रार्थदूषणभूषणप्रसंगादिति । यद्वास्मृतस्योपेक्षानर्हत्वरूप
प्रसंगादित्यर्थः ॥ शाब्दिकानामिति । सप्तसुप्रथमेतिपठतामित्यर्थः। तथाचश्रुतौनाम्निब्रह्मेत्यादियोजनेतिभावः ।
॥ प्रतीकेष्विति । विषयसप्तमीयंनत्वाधारसप्तमी । अनेनकःप्रतिज्ञादोषउक्तइत्यतआह ॥ अयमर्थइति । प्रसंजकाभा
वादिति । नामब्रह्मेत्येवश्रवणेननामात्मेत्यश्रवणादितिभावः ॥ प्रमाणविरुद्धमिति । द्वासुपर्णानिर्विकारोक्षरइत्यादिप्र
माणविरुद्धमित्यर्थः ॥ अतिप्रसंगादिति । अंगुल्यग्रेहस्तिशतमित्यादेरपिकेनचिदुक्तस्यनिषेधप्रसंगादित्यर्थः ॥ तस्मादि

तीति । हेत्वंशार्थोप्ययुक्तइतिशेषइतिभावः । अन्यथाऽनन्वयप्रसंगात् ॥ [६२०।३] परामर्शइति । पुनरनुसंधानंपरामर्शः।इतिपक्षो
यदेत्यस्यार्थमाह ॥ [६२०।६] इत्येवमिति । अत्रेतिमूलानुवादः । प्रतीकेष्वितिव्याख्या ॥ चशब्दोपव्याख्यानेत्यादि । नकेवलं
नात्मेत्यादिसूत्रार्थोनयुक्तः । किंत्वेतत्सूत्रार्थोपीतिसमुच्चयइत्यर्थः । परमसाध्यंवदन्नेवयुक्तिप्रकारंव्यंजयति ॥ [६२०।८] एतदुक्तंभव
तीति ॥ अप्रमेति । अप्रमाणमित्यर्थः ॥ अनैकांत्येनेति । ब्रह्मप्रतीकयोरतादात्म्येपिब्रह्मदृष्टेर्नामादावंगीकारादिति
भावः । तत्रापिपूर्वसूत्रेपीत्यर्थः । हेतोरभावान्नानैकांत्यमित्याशंक्यनिराह ॥ [६२०।११] नचेति ॥[६२०।१२]असिद्धिरिति । तादात्म्याभाव
रूपहेतोरितियोज्यं ॥ [६२०।१४] अतद्भावइति । तादात्म्येऽसत्यपीत्यर्थः ॥ अतिप्रसंगसमुच्चयार्थइति । अवशिष्टहेतुपक्षेयुक्ति
विरुद्धत्वरूपातिप्रसंगेनसहविशिष्टहेतोरप्यात्मत्वेनोपासनापादनरूपातिप्रसंगसमुच्चयार्थइत्यर्थः।यद्वाविशिष्टहेतुव्याख्यानपक्षे
नकेवलंपूर्वसूत्रेऽसिद्धिः किंतुआत्मत्वोपासनप्रसंगश्चेत्येवंसमुच्चयार्थइत्यर्थः।अतद्भावइत्यनुवादः। अब्रह्मत्वइतिव्याख्या । हि
शब्दार्थोयस्मादिति ॥ [६२०।१८] असिद्धिःस्यादिति । नहिसइत्यत्राभिमतस्योपास्यस्योत्कर्षप्राप्त्यभावेसत्यतद्भावरूपहेतोरितियो
ज्यं । ननुपरेणविशिष्टहेतोरुक्तत्वादिहातत्वंनोपास्यमितिविशेषणंविनाकृतस्यव्याप्त्युक्तिरसंगतेत्यतआह ॥ [६२०।२०] अत्रंव्यासेरि
ति ॥ [६२०।२५] ततइति । अचेतनस्यब्रह्मत्वध्यानान्नपुरुषार्थलाभइतिपूर्वेणान्वयः । शंकते ॥ [६२१।२] नेवयंब्रह्मणीति ॥ ततःपुरुषा
र्थप्राप्तिरिति । अकुपितंब्रह्मैवफलंदास्यतीतिभावः । प्रकृतानुगुण्यायाह ॥ अत्रोक्तेशब्देनेति । [६२१।४] अन्यथोक्ति

मात्रस्योपचारेणापिसंभवादनानुगुण्यंस्यादितिज्ञेयं । राजवदित्यस्यार्थोराजायथेति । तत्रतस्येवेत्यस्यप्रायिकत्वात्प्रथमांता
दपिवतिरितिभावः । दृष्टेःप्रकृतत्वादाह ॥ [६२१।८]पूजयेति ॥ [६२१।९]तादृश्यामिति । दृष्टेरुन्नायिकायामित्यर्थः । प्रोक्तेपीत्यत्रप्रश
ब्दार्थप्रकर्षेणेत्यनूद्यतंप्रकर्षंव्यक्तीकुर्वन्नाह ॥ [६२१।१०]नमयेत्यादिना । इतिवदित्यनुवादः । इत्यत्रयथातथैवेतिव्याख्या ॥
[६२१।११]विवेकार्थमिति । पूजातोसंकीर्णस्यदृष्ट्युन्नायकस्यप्रवचनस्योक्त्यर्थमयंश्लोकइत्यर्थः । तर्हितथाप्रोक्तिरेवकोपहेतुरस्त्विति
नवाच्यं । आचार्यपित्रादिनाशिक्षारूपेणैतादृशवाक्योक्तौकोपादर्शनेनतथादृष्टेरेवतथात्वादितिभावः ॥ द्वैरूप्यमिति ।
नामादिप्रतीकोद्देशेनब्रह्मत्वविधानं ब्रह्मोद्देशेनप्रतीकत्वविधानमित्येवमुद्देशविधानोक्त्योर्द्वैरूप्यमित्यर्थः ॥ [६२१।१३]व्यक्तिभेदेने
ति । चंडालेराजांतरतादात्म्यमन्यस्मिन्देशांतरेतस्मिन्नेवराज्ञिचंडालत्वमुक्तंचेदपिपुरस्थितेराजनिनीचत्वदूषणंनप्राप्नोति ।
अतएकस्मिन्नेवतद्वचनप्राप्त्यर्थमयमित्युक्तिरित्यर्थः । शंकते ॥ [६२१।१४]द्वयोरभेदेनेत्यादि । भाव्यतेचिंत्यतइत्यर्थः । तदित्यनुवा
देनतयोरितिविपरिणामेननिर्देशः । ब्रह्मप्रतीकयोरितिव्याख्या । अभिप्रायस्यास्फुटत्वादाह ॥ [६२१।१६]एतदुक्तंभवतीति । ननु
ब्रह्मकार्यस्यनामादिप्रतीकस्यब्रह्मरूपकारणाभेदोपिब्रह्मरूपकारणस्यनामादिताभेदादित्येवंभेदाभेदाभिप्रायेणब्रह्मणोनीचत्वंन
प्राप्नोतीत्यतआह ॥ [६२१।१७]भेदाभेदेति । एवंविधंभेदाभेदंनिराह ॥ नहीति । मृदितिभिन्नंपदं । घटाद्भिन्नेत्यन्वयः ॥
[६२१।१८]परस्परमिति । कार्यस्यकारणात्कारणस्यकार्याद्भेदाभेदावित्यर्थः ॥ तस्मादिति । कारणेब्रह्मणिकार्याभेदस्यसत्त्वादित्य

र्थः ॥ [६२१।२०] **श्रुतिविहितमिति** । नामब्रह्मेत्युपासीतेत्यादिश्रुतिविहितमित्यर्थः ॥ [६२१।२१] **एतेनेति** । अन्यस्यान्य(थाध्या)ताध्याना दनर्थकथनेनेत्यर्थः ॥ ७ ॥ परमतदूषणं ॥ ७ ॥ ४ । १ । ४ ॥ ७ ॥ [६२१।२४] **तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौ** । पूर्वो त्तरमूलयोःसंगतिंवक्तुमाह ॥ **निवृत्तेति** । निरूप्यतेसूत्रकृतेतियोज्यं ॥ [६२१।२५] **तत्रेति** तदधिगमसूत्रे । तथेत्यनुवादः उक्ते त्यादिव्याख्या । विष्णुःस्वामीतिप्रतीकेषुब्रह्मास्तीतिविष्णुब्रह्मगुणपूर्णइतिचोक्तप्रकारेणेत्यर्थः ॥ [६२२।१] **अनेनेति** । अनिष्टपुण्य नाशकथनेनेत्यर्थः । अतःमुक्तावनुभवकारणादन्यत्पुण्यंनश्यति अप्रारब्धमनभीष्टंचेतितत्रार्थकथनादितिभावः ॥ [६२२।३] **पुनरुक्त तेति** । तत्रापिब्रह्मविदःपुण्यनाशोक्तेरितिभावः । भवत्पक्षेपिकथंनपुनरुक्तिराद्यसूत्रेणेत्यतआह ॥ [६२२।४] **अस्माकंत्विति** । **सूत्राणीति** । अग्निहोत्रादितुतत्कार्यायैवतद्दर्शनात् । अतोन्यदपीत्येकेषामुभयोः भोगेनत्वितरेक्षपयित्वाथसंपत्स्यतइ तित्रीणिसूत्राणियथाक्रमंकाम्याकाम्यप्रारब्धरूपपुण्यविभागसूचनार्थानीत्यर्थः । यदेवविद्ययेतिसूत्रंत्वग्निहोत्रादितिसूत्रा र्थोपोद्बलकमितिभावः । परोक्तसूत्रार्थेदोषांतरमाह ॥ [६२२।५] **ज्ञानोत्तरमिति** । **प्रकृतेति** । पूर्वत्राश्लेषशब्दितासंबंधरूपार्थस्यैवप्र कृतत्वादितिभावः ॥ [६२२।७] **सूत्रेणेति** । पुरुषार्थाधिकरणस्थसूत्रेणेत्यर्थः । दोषोक्तेःस्थानप्रदर्शनायअत्रेत्यनुवादः ॥ [६२२।८] **वक्ष्यमाणइति** । उत्तरश्लोकइतिभावः । पूर्वत्रान्वितत्वत्पुनरनुसंधानायाह ॥ [६२२।१०] **वर्ततइति** ॥ **अनारब्धेति** । अनारब्धकार्येएवपूर्वे पुण्यपापेविनाश्यतः । तस्यतावदेवचिरंयावन्नविमोक्षेअथसंपत्स्यतइतितदवधेरितिसूत्रार्थः । ब्रह्मणामित्यस्यभिन्नप

दत्वेशतपदेनसमस्तेनान्वयसामर्थ्याभावादाह ॥ [६२२।१४] **ब्रह्मणांशतमितीति** । पंक्तिविंशतित्रिंशच्चत्वारिंशदित्यादिपंचमा द्यपादीयसूत्रेविंशतिपदस्यैवोक्तेर्विंशदितिकथमित्यतआह ॥ [६२२।१६] **विंशतिपर्यायइति** । प्रामाणिकप्रयोगात्सोपिशब्दोभ्युपेय इतिभावः । ब्रह्मणांविंशतिरेवेंद्रस्येत्यादेरन्वयमाह ॥ **ब्रह्मणांविंशतिरेवेत्यादि** । जातावेकवचनमित्युक्तेर्ब्रह्मणामित्यु क्तिः । व्यवहितत्वादन्वयमाह ॥ [६२२।१८] **ब्रह्मणासहनारायणंव्रजेदिति** ॥ ७ ॥ ४ । १ । ८ ॥ ७ ॥ श्रीइतिश्रीमन्न्यायसुधाप रिमळेचतुर्थाध्यायस्यप्रथमःपादः ॥ ४ ॥ १ ॥ ७ ॥

॥ इतिश्रीमन्न्यायसुधापरिमळेचतुर्थाध्यायस्यप्रथमःपादः ॥

॥ अथश्रीमन्न्यायसुधापरिमळेचतुर्थाध्यायस्यद्वितीयपादः ॥

श्रीगुरुभ्योनमः॥ स्वयंकृतापितद्व्याख्येत्यादिस्वप्रतिज्ञानुसारेणभाष्यंस्पष्टीकरोतीत्याशयेनमूलमवतारयितुंस्पष्टीकृतौकानुपप
त्तिरित्यतोभाष्यमनूद्यतत्रानुपपत्तिंदर्शयति ॥ [६२३।१] द्वितीयेति ॥ [६२३।२] अन्यत्रवेति । पादांतरे ॥ [६२३।३] प्रकरणेति । देहत्यागोक्तिप्रकर
णवशादित्यर्थः ॥ [६२३।४] देहादिति । तथाचमोक्षेप्युत्क्रांतिरूपएवप्राप्तइतिभावः । ऋषिगंधर्वादिग्रहणायाह ॥ [६२३।६] मनुष्यशब्दइ
ति ॥ [६२३।७] नप्रायेणेति । प्रायपदव्यावर्त्यस्याग्रेजातानांमानुषेलोकेइत्यादिनामूलएवव्यक्तत्वादिहानुक्तिः ॥ [६२३।८] एतद्भाष्यमपी
ति । उत्तरपदभाष्यमपीत्यर्थः ॥ (स्फुटंचै) [६२३।९] स्पष्टंचैतदिति । इतिव्याख्येयमितिस्वोक्तंप्रमेयंउत्तरपादेयेशरीरादुत्क्रांताः
मानुषास्तेषांभगवल्लोकागमनार्थोमार्गः येकर्मणोदेहाच्चविमुक्ताःतेषांसर्वेषामपिगम्यमिदमुभयमेतत्पादोदितमितिवक्ष्यतीत्य
र्थः । समस्तपादप्रतिपाद्यलाभायाह ॥ [६२३।१०] उत्क्रांतिशब्देनेति ॥ [६२३।११] मार्गशब्देनेति । प्राप्तिश्चेतिलक्ष्यतइत्यन्वेति ॥ विप
[६२३।१२] र्ययेणेति । चतुष्टयफलानुवादेनमोक्षत्वंविधेयमित्यर्थः । आवर्तनीयमिति । कर्मक्षयादयःक्रमात्भवंत्यतःपादेषुक्रमादु
दिताइत्यावर्तिताइत्यन्वयइत्यग्रेव्यक्तं ॥ [६२४।१] स्वयोग्यमार्गेणेति । अर्चिरादिमार्गेणेत्यर्थः । उत्क्रांतिपदोपलक्षितदेवानांचस्वो
त्तमदेवप्रवेशमार्गेणेत्यर्थः । शेषगरुडमार्गेणेतिवार्थः ॥ [६२४।२] अंतर्भावेति । फलाध्यायेचतुर्विधफलबोधकपादानामंतर्भावात्क्रमि
कार्थबोधकानांपूर्वपूर्वपादानंतर्याच्चेतिभावः । अयमर्थइत्यनेनेतिशब्दान्वयः॥ [६२४।४] न्यायविवरणइति । भूतेषुतच्छ्रुतेरितिसूत्र ॥४७१॥
न्यायविवरणेतत्तद्भूतोद्भवत्वात्तत्तद्देवानामित्युक्त्वातत्समानानांचविशेषवचनाभावेस्वसमानलयस्थानएवलयोपपत्तेरित्युक्तेर

स्रष्टृष्वपिप्रवेशोभिमतइतिभावः । यथाऽश्विप्रभृतीनांवरुणाद्यजातत्वेपिस्वसमानाबादिदेवतालयस्थानेवरुणादौलयइतिध्ये
यं।उक्तंहिभाष्ये । वरुणेऽश्विनावग्नावग्नयःतथाऋभवःपृथिव्यांवरुणआपोग्नयइत्यादि । ननुब्रह्मलयात्पूर्वमेवदेवानांलयात्कथं
स्रष्टृषुप्रवेशोक्तिःब्रह्मणोलयइत्युच्यतइत्यतआह ॥ प्रत्यासन्नइति । ननुकथंप्रवेशोमार्गेउद्दिष्टइत्यतआह ॥ प्रवेशा
र्थमित्यादि ॥ [६२४।५] अतएवेतीति । स्रष्टृषुदेहलयादेवेत्यर्थः । जीवेउत्क्रांतेदेहमात्रस्यतत्रलयइतिभ्रमनिरासायाया
ह ॥ [६२४।६] चेतनाधिष्ठितएवेति । तत्रेत्यनुवादः । स्रष्टरीतिव्याख्या । ततइत्यस्योपपत्तयेयतइत्यस्यान्वयमाह ॥ चे
[६२४।७] तनेत्यादि ॥ [६२४।८] इतिसंबंधइति । तेन । चेतनाधिष्ठितत्वरूपविशेषलाभइतिभावः ॥ मार्गांतरमिति । स्रष्टरिप्रवेशार्थं
तदभिसर्पणरूपमित्यर्थः । सर्वशइत्यस्यापिपदान्वयेनार्थःसर्वेषामपीति । भवेदित्यनुवादेनतत्रशेषमाह ॥ अर्चिरादिरिति
[६२४।१०] शेषइति।अपौनरुक्त्यायाह॥ इत्युक्तानुवादइति॥ इत्युक्तत्वादिति। आद्यश्लोकेउक्तत्वादित्यर्थः॥ [६२४।११] उक्तयुक्तीति। स्रष्टृ
ष्वितिश्लोकेलयाच्चैवेतिश्लोकेचोक्तयुक्तीत्यर्थः। ननुनतदामुक्तिरित्यनेननचोद्यपरिहारः प्रायःपदव्यावर्त्यसत्त्वेप्रागुक्तयुक्तिवि
रोधःतदसत्त्वेतत्पदवैयर्थ्यमित्यतःकालभेदेनसमाधिमाह ॥ [६२४।१२] एतदुक्तमिति॥ सामान्यमिति । मोक्षामोक्षकालीनत्वविशेष
मनादायमोक्षामोक्षकालीनसाधारण्यमपेक्ष्येत्यर्थः ॥ [६२४।१३] भेजइति । प्रथमस्कंधेसप्तदशोध्यायेसवैमहाभागवतःपरीक्षिद्येनापव
गाख्यमदभ्रबुद्धिः । ज्ञानेनवैयासकिशब्दितेनेतिपूर्वशेषः । समानकर्तृकक्रियापूर्वकालीनत्ववाचिक्त्वादेशल्यपोनिर्वाहाय

क्रियांतरमाह ॥ [६२४।१४] प्रांप्यांवस्थितानामपीतियोज्यमिति ॥ [६२४।१५] वैकुंठादिस्थमिति । अमुक्तस्थानगतमितिभावः । ननुभूस
त्तायामित्यतःआशिषिलिङ्लोटावित्याशीरर्थेलिङिलिङाशिषीतितस्यार्धधातुकसंज्ञायांतिबादेशशपोप्राप्तौयासुट्परस्मैपदेषू
दात्तोङिच्चेतितिपोयासुडागमेगुणाभावेइतश्चेतितिपइकारलोपेस्कोःसयोगाद्योरितिसकारलोपेभूयादितिरूपंभवति नचेहाशी
र्विषयत्वमस्तियेनलिङआर्धधातुकतयाशपोप्राप्तौभूयादितिरूपंसाधुस्यात्किंतुभवेदितिभाव्यमित्यतआह ॥ छंदसीति । यद्य
पितृतीयाध्यायस्यचतुर्थपादेतिङ्शित्सार्वधातुकं । आर्धधातुकंशेषः । लिट्च । लिङाशिषि । छंदस्युभयथेतिछंदोविषये
आशीर्लिङ्सार्वधातुकमार्धधातुकंचेत्युभयथाभवतीत्येवप्रस्तावात्प्राप्तंनत्वनाशीर्विषयविषयंआर्धधातुकमित्यपि तथापिसर्व
प्रकरणमपेक्ष्यैतदुच्यते । व्यत्ययोबहुलमित्यस्यैवायंप्रपंचइतिवृत्तावुक्तत्वादेतदपितत्राभिप्रेतमितिभावः ॥ [६२४।१६] स्वांध्यमादावि
ति । साक्षान्मुक्तिर्लिंगभंगरूपामुक्तिर्ब्रह्मणासहैवभवेदितिसाध्यंश्लोकस्यादौवाच्यमित्यर्थः । कुतोहेतोरित्यतःयतःसाक्षान्मु
क्तिर्ब्रह्मणासहैवभूयादितीश्वरस्याशीःआशानमस्तिअतःकारणादितिनिमित्तं कुतोज्ञायतइत्यतइतिशास्त्रनिर्णयइतिज्ञापकं
चानेनश्लोकेनोच्यतइत्यर्थः । शास्त्रेणक्रियमाणोनिर्णयःशास्त्रनिर्णयइतितस्यार्थोध्येयः । क्षमांभोनीलेत्यादिनाऽपौनरुक्त्या
याह ॥ [६२४।१७] भूतानामादिरिति । सचत्रिविधोहंकारइत्यग्रेव्यक्तं ॥ [६२४।१८] त्रिविधस्येति । तैजसतामसवैकारिकभेदेनत्रिविधस्येत्य
र्थः । तामसाहंकारस्यैवभूतकारणतयाभूतादिपदेनग्रहणेप्यन्यांशयोरप्राप्तेभूतादिपदोपलक्षितस्येत्युक्तं छत्रिन्यायेनेतिभावः ॥
देवाःउच्यंतइति । तथाचभूतादिभिःपरिवृतःसन्अव्याकृतंविशतीत्युपपन्नंजडत्वेतदयोगादितिभावः । परोविविक्तइत्यस्याव

धिमाह ॥ [६२४।१९] क्ष्मादिर्भ्यइति । एवमित्यस्यार्थः तदेति । भगवत्पदेनतल्लोकोविवक्षितः । अन्यथाब्रह्मोपयांतीत्युत्तरवाक्यानुपपत्ति रितिभावः । कर्त्राद्यर्थायोगादाह ॥ [६२४।२०] इत्थंभूतेति । मुक्तत्वरूपप्रकारंप्राप्तानांलिंगभंगोलक्षणंज्ञापकमितिकमंडलुनातापसमद्रा क्षीदितिवत्तृतीयेत्यर्थः । चशब्दान्वयेनानुवादस्तच्चेति । ननुसहैवब्रह्मणेत्यत्रभगवंतमितिश्रुतेःक्ष्मेतिपुराणस्यचोक्तावपिचशब्दे नसमुचितेर्थेनोक्तंश्रुत्यादिकमित्यतआह ॥ [६२४।२१] श्रुत्यादिकमिति । नैकस्मिन्दर्शयतोहीतिसूत्रेपृथिव्यामृभवोविलीयंतइत्यादिश्रु तेःऋभवःपृथिव्यामित्यादिश्रुतेः । तथासोध्यक्षइतिसूत्रेमुक्ताःसंतोग्निमाविश्येत्यादिस्मृतिवाक्यादेरुक्तत्वादितिभावः ॥ अ [६२४।२३] स्मिन्निति । पादइत्यर्थः ॥ भाष्यइति । श्रीमत्सूत्रभाष्यइत्यर्थः । आद्यादिभ्यउपसंख्यानमितितसिप्रत्ययांतत्वमुपेत्याह ॥ उ [६२४।२४] त्तरोत्तरेष्विति ॥ अतइति । सूत्रकृताप्रथमंदेवानांलयस्योक्तत्वादित्यर्थः ॥ [६२५।२] बाह्येति । अंडाद्बाह्यानांवागादींद्रियरूपतत्त्वानांतै जसाहंकारेलयात्मनस्तत्वस्यचवैकारिकेलयादत्रोक्तलयोनतद्विषयइतिज्ञापनायदेहगानामित्युक्तिरित्यर्थः ॥ [६२५।४] वाचैकाएवेति । तदधीनत्वन्यायादितिभावः । पादार्थसंगत्योरुक्तिः ॥ ७ ॥ मूलोक्तान्पादानामर्थान्बुद्ध्यारोहायानुवदन्नुत्तरग्रंथसंदर्भमवता रयति ॥ भवेदेवमित्यादिना । कर्माणइत्यंतंप्रथमपादार्थः । प्रारब्धबुद्ध्योक्तंभोगाभ्यामिति । देहाइत्यंतंद्वितीयपादार्थः ॥ [६२५।५] स्वोचितेनेति । शेषगरुडमार्गयोरन्यतरेणेत्यर्थः । उपासीनाइत्यंतंतृतीयपादार्थः । स्वरूपेणेत्यादिचतुर्थपादार्थः ॥ [६२५।८] इत्या दिनोक्तमिति । तत्रसंक्षेपेणोक्तस्यग्रंथकर्त्रभिमतस्यविवरणेनास्माभिरनूदितइतितत्रानुक्तानुवाददोषोनशंक्यत‍इतिभावः ॥

इत्यादीति । गीतायामंतिमेध्यायेज्ञानंकर्मचकर्ताचत्रिधैवगुणभेदतः । प्रोच्यतेगुणसंख्यानेयथावच्छृणुतान्यपीतिप्रतिज्ञा पूर्वकंज्ञानकर्मकर्तृणांसात्त्विकराजसतामसभेदेनप्रत्येकंत्रैविध्योक्तेरितिभावः । एवकारयोरन्वयंदर्शयन्नेवकृत्यंव्यनक्ति ॥ **मि** [३२५।१५] **श्रंज्ञानइत्यादिना** । अव्ययीभावसमासेविसर्गोनयुक्तइत्यतआह ॥ **भिन्नंपदमिति** । ननुयदीत्यादिनाकृतचोद्यस्यकथं तमसान्यथैवमतिरित्यनेननिरासइत्यतआह ॥ **तमोगुणइति** । आभासानांप्रमाणाभासानामित्यर्थः ॥ [६२५।१६] **इत्यादीति** । रजो गुणःप्रमाणेष्वेवचेतःप्रवृत्तिंप्रतिबध्याभासेषुदोषानाच्छाद्यप्रमाणतदाभासानांसाम्यबुद्धिमुत्पाद्यमिश्रज्ञानंजनयति ।सत्वगुणः प्रमाणेष्वेवचेतःप्रवृत्तिमुत्पाद्यआभासेषुदोषान्व्यक्तीकृत्ययथावन्मतिंजनयतीत्येवंज्ञेयमित्यर्थः । विधेयत्वेप्रकृतासंगतिरि त्यतआह ॥ [६२५।१७] **यद्यपीति** ॥ [६२५।१८] **अनित्यमेवेति** । कुतश्चिज्जायतइत्यनुकर्षः । उत्तरवाक्यमवतारयितुंशंकामाह ॥ [६२५।२०] **करणं नि मित्तइति** । यत्संनिकृष्टेनेत्यादिनाविषयलक्षणस्यजिज्ञासासूत्रेऽन्यथाख्यातिवादेऽभिधानादितिभावः ॥ **वैशद्यभेद श्चेति** । प्रत्यक्षजन्यस्यवैशद्यंदृष्टं विषयगतरेखोपरेखादेरपिविषयीकरणात् अनुमानजातस्यचतदभावादितिभावः ॥ **सर्व विषयंवेति** । विशेषविषयनियामकादितिभावः ॥ **एवंवैशद्येपीति** । अविशदंवासर्वथाविशदंवास्यादित्यर्थः ॥ [६२५।२२] **गुणा तीतेति** । सत्त्वगुणजन्यानेतितदर्थःप्रागेवोक्तइतिभावः । कुतोनजायतइत्यतआह ॥ **महाशुद्धेति** । जडमनित्यंचकुतश्चि ज्जायतेस्वरूपचेतनात्मकंनित्यंचश्रियोज्ञानंकथंजायेतइतिचेतनत्वंनित्यत्वंचेतिद्वयंचेचितिपदलब्धंतत्रहेतुरित्यर्थः । दैत्यरक्षः प्रभृतीनांस्वरूपज्ञानेऽविद्यमानंसम्यक्त्वंश्रीज्ञानेकथमित्यतःशुद्धेत्युक्तं । स्वाभाविकदोषरहितेत्यर्थः । इतिपूर्ववदेवव्याख्येयमि

तिभावः ॥ [६२५।२३] **एतदपीति** । ननुस्पष्टैवेत्यस्यातिविशदैवेत्यर्थः तत्रवैशद्यविषयनियमयोर्यत्सन्निकृष्टकरणेनेत्युक्त्याकरणनिमित्त त्वात्कथंश्रियश्चितिरजन्यापिविशदैवेत्युच्यतइत्यतस्तन्माहात्म्ययोगतइत्येतदत्राप्याकृष्यतदुपपादकत्वेनव्याख्येयमित्यर्थः ॥ [६२५।२४] **परागुणेभ्यइति** । गुणजन्यानेत्यर्थः । महाशुद्धिचितिरित्यनंतरमितिशब्दोध्याहार्यः ॥ तथात्वेइतितत्रपूर्ववदेवहेतुरि त्यन्वयःश्लिष्टोभवति । व्याख्यातप्रायमेतत् ॥ [६२६।१] **इतिवद्व्याख्येयमिति** । वैशद्यविषयनियमयोःकरणनिमित्तत्वद र्शनेपियथामुक्तज्ञानानांनित्यमाहात्म्ययोगतइत्यनेनबह्वर्थविषयकत्वंवैशद्यंचोपपादितंअत्रापितथोपपादनंकार्यमित्यर्थः । **गु णातीतत्वइति** [६२६।१२] । गुणाजन्यत्वइत्यर्थः ॥ [६२६।१३] **विक्रियंतइति** । तत्तदाकारतयामायावादमतइवविकारवत्किमित्यर्थः । ननुनिर्भेदज्ञानस्याविकारिणस्तदातदाप्राप्तानेकपदार्थविषयकत्वंकथमित्यतआह ॥ [६२६।१४] **अत्रचविशेषएवेति** । ज्ञानगत सामर्थ्यलक्षणविशेषएवभेदप्रतिनिधितयाभेदकार्यनिर्वाहकइत्यर्थः ॥ [६२६।१५] **अतएवेति** । विशेषनिर्वाह्यत्वसूचनार्थत्वादे वैकाखंडेत्यनुक्त्वानिरंतरानिर्भेदेत्युक्त्याभेदप्रतिनिधिविशेषःसूचितइतिभावः । अपौनरुक्त्यायाह ॥ **इतिशुद्धत्व व्याख्यानमिति** ॥ **पूर्ववदिति** । कदापिबाह्यदोषसंबधोनेतिवक्तुंमहच्छब्दप्रयोगइतिभावः ॥ [६२६।१६] **नित्यमेवेतीति** । नित्यमेवेतिपदद्वयंनकेवलमविकारिणीत्यत्रान्वेति किंतुतदर्थंमहच्छब्दव्याख्यानार्थं अत्रापिवीतदोषइत्यत्रापियोज्यमित्यर्थः । तथाचनिर्लेपेतिशुद्धत्वव्याख्यानं । नित्यमेववीतदोषेतिमहच्छब्दव्याख्यानमितिभावः । यद्वानित्यमेवेत्येतत्तदर्थंदोषसंबं धस्यसार्वकालिकत्वार्थमत्रापिमहच्छब्देपियोज्यमित्यर्थः ॥ **व्याख्यानत्वेनापीति** । नकेवलंगुणेभ्यःपरेतिगुणाती

॥११॥ तत्वंव्याख्यानत्वेनेत्यपेरर्थः ॥ [६२६।१०] **स्वरूपंकथनमिति** । तत्तंत्रत्वमात्रस्यनताद्दशीत्यत्रहेतुत्वसंभवादितिभावः ॥ [६२६।११] **वैशेद्या**
दीति । अत्रादिपदेनेश्वरविषयेश्रियोमतेरिवाधिकविषयत्वाभावादितिगृह्यते ॥ **केवलमित्युक्तीति** । तस्यभगवन्मात्रा
धीनत्वार्थपरत्वेनब्रह्ममतेश्चेशरमोभयाधीनत्वात्तदभिप्रायेणप्रायइत्युक्तमित्यर्थः ॥ [६२६।१२] **अतएवेति** । ब्रह्ममतिव्यावृत्त्यर्थत्वादेवे
त्यर्थः ॥ **तत्रेति** । श्रीप्रकरणेकेवलमित्युक्तमित्यर्थः । अस्मिन्पक्षेनस्वरूपकथनंतदितिभाति । सम्रुद्रतरलोपमेत्यस्यतात्पर्या
र्थःवृद्धिह्रासवतीति । शक्तिव्यक्त्यात्मनाबह्वर्थाल्पविषयिणीत्यर्थः । निर्भेदमतौकथमेतदित्यतउक्तं ॥ **विशेषबलेनेति** ।
[६२६।१४] **यथोक्तमिति** । एतदध्यायांतेभोगमात्रसाम्यलिंगाच्चेतिसूत्रभाष्ये । अवृद्धिह्रासरूपत्वंमुक्तानांप्रायिकंभवेत् । कादाचित्कवि
शेषस्तुनैवतेषांनिषध्यतइत्युक्तमित्यर्थः ॥ [६२६।१७] **अंधंतमसइति** । अवसमंधेभ्यस्तमसइतिसमासांतः ॥ [६२६।१८] **अतत्वेति** । गीतायामं
तिमेध्यायेयत्तत्कृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकं । अतत्वार्थवदल्पंचतत्तामसमुदाहृतमितितामसज्ञानस्वरूपमुक्तमित्यर्थः ।
अतत्वार्थविषयकंयदल्पंसम्यग्ज्ञानंतत्तामसमित्यर्थः । तत्रमोक्षस्वरूपमित्यादेर्व्यवहितत्वाद्बुध्यारोहायसर्वस्यनिष्कृष्टार्थमाह ॥
ज्ञानानामिति । अवधीरणादनादरणादित्यर्थः । धृञ्अनादरइतिधातोः ॥ [६२६।२०] **सहकारीति** । नानाविधतत्तद्दर्शनरूपसह
कारिवैचित्र्यादित्यर्थः । आधुनिकमतानांमोक्षविषयकभ्रमहेतुमूलकारणवैचित्र्यापादकंकथमित्यतआह ॥ [६२६।२१] **मतानामिति** ।
उक्तंसमयपादादिभागेउक्तमित्यर्थः ॥ ७ ॥ उत्तरग्रंथमवतारयति ॥ [६२६।२२] **समधिगतमेतदित्यादिना** ॥ एकइत्यादि । स ॥४७४॥
र्वस्यप्रमाणमूलत्वेहिविरुद्धानेकप्रकारतामोक्षस्यप्राप्नोति । सर्वस्यमिथ्याज्ञानमूलत्वेचवस्तुनोनिःस्वरूपत्वतास्यात्अतएवंवाच्य

मित्यर्थः । हेयत्वंमोक्षविषयेइतियोज्यं । तेनसमयपा(दापौ)दादपौनरुक्त्यंध्येयं । एवकारान्वयेनानुवादोनित्यमेवेतिचेति । अयंविशेषइतिपूर्वेणान्वयः॥ [६२७।३] अनंतचतुष्टयेति । जीवोज्ञानदर्शनसुखवीर्यगुणइतिसमयपादेसुधोक्तदिशाऽनंतं(पूर्णं)यच्चतुष्टयंज्ञानादितदवाप्तिस्तदाविर्भावइत्यर्थः । ज्ञानादेर्जीवस्वभावत्वात्अनंतत्वंज्ञेयं । ज्ञानदर्शनयोःसामान्यविशेषभावेनभेदः ॥ [६२७।४] केवलमिति । मूलप्रमाणशून्यमित्यर्थः। देहबंधान्मुक्तोजीवःऊर्ध्वगतिमान्बंधमुक्तत्वात्पंजरोन्मुक्तखगवदित्यनुमानमित्यर्थः। यद्वाविमतागतिःसुखयुतादुःखहीनाचऊर्ध्वगतित्वात्पंजरोन्मुक्तखगगतिवदित्याद्यनुमानमित्यर्थः॥ [६२७।५] बाधइति । विप्रतिपन्नेत्यनुक्तोवचेतनदेवदत्तगत्योरपिपक्षतापत्तेर्बाधसिद्धार्थत्वेइत्यर्थः । हेतौचेतनाश्रितेत्यनुक्तौचाचेतनगतौव्यभिचारश्चप्राप्नोतीत्यर्थः।दुःखेतेत्यत्रदुःखहेतुरितिभ्रमनिरासायाह ॥ [६२७।६] दुःखेनेति । दूरगतित्वादितिवातीव्रगतित्वादितिवाहेतुर्विशेष्यतेऽतोनव्यभिचारइत्यतआह ॥ [६२७।७] दूरत्वस्येति । मुक्तगतेःसंसारदशापन्नदुःखेनअस्तिसामानाधिकरण्यमित्यतःसिद्धार्थत्वनिरासायसमानकालीनेत्युक्तं ॥ [६२७।९] सुसंगताविति । उत्तमानांजाग्रतिचक्षुरादौरूपांतरस्यसतःप्राज्ञंप्रतिगतौ तथासर्वजीवानांहृत्कर्णिकामूलस्थानांकर्णिकामध्यस्थप्राज्ञंप्रतिगतौचेत्यर्थः । प्रजाअहरहर्गच्छंत्यएतंब्रह्मलोकंनविंदंतीतिसुप्तस्यगतिश्रवणाद्गतिशब्दाभ्यामितिसूत्रोक्तेश्च । एकत्रसुप्तस्यान्यत्रनियतावितिवार्थः । एकंचतदनुमानंचेतिविग्रहेत्वेकानुमानशरणस्येतिभाव्यमित्यतआह ॥ [६२७।११] अन्यथेति ॥ पूर्वेति । पूर्वकालैकसर्वजरत्पुराणनवकेवलाःसमानाधिकरणेतिसमासविधायकेद्वितीयाद्यपादस्थसूत्रेएकशब्दस्यप्रथमानिर्दिष्टतयाप्रथमानिर्दिष्टंसमासउपसर्जनमित्युपसर्जनसंज्ञायांउपसंर्जनंपूर्वमितिपूर्वनिपा

तःस्यादित्यर्थः । तत्रेत्यनुवादः देवदत्तेत्यादिव्याख्या ॥ अनूर्ध्वेताविशिष्टमिति । तच्चदृष्टांतेसत्त्वात्पक्षेचासत्त्वात् साध्य
व्यापकत्वेसतिसाधनाव्यापकत्वाद्भवत्युपाधिरितिभावः ॥ लक्षणेति । व्याप्तिरूपेत्यर्थः ॥ उक्तत्वादिति । युक्ति
पादोद्ग्रंथे साध्यव्यापकवैलोम्यमित्युपाधिलक्षणविवरणप्रकरणेसाध्यसमव्यापकस्योपाधित्वखंडनप्रस्तावेउक्तत्वादित्यर्थः ।
अधर्मत्यागेनखगगत्युक्तौतात्पर्यंवक्तुमाह ॥ इदमुक्तमिति ॥ अनेनेति । खगगतौसाध्यव्यापकत्वकथनेनेत्यर्थः ॥
प्रत्यागमनेति । तथाचोर्ध्वगतौदुःखेतत्वरूपसाध्यस्यैवाभावान्नसाध्यव्यापकत्वदोषइतिभावः ॥ शरीरवृत्तित्व
मिति । पक्षेचदेहबंधान्मुक्तगतौगतित्वरूपसाधेसत्यपिउपाधेरभावात्साधनाव्यापकमितिभावः । तदित्यनुवादः दूषणपदेना
न्वयः । उपाधिनिमित्तदूषणमित्यर्थः ॥ नत्वनैकांत्यादिकमिति । व्याप्यत्वासिद्धिरादिपदार्थः । अस्फुटत्वादाह ॥
एतदुक्तमिति । उपाधेःप्रतिपक्षानुमापकस्यप्रतिपक्षत्वोक्तिरयुक्तेत्यतोवाह ॥ एतदुक्तमिति । नत्वित्युक्त्याचस्त्वर्थइति
सूचितं ॥ अतएवेति । अकिंचित्करत्वादेवोपाधिरपिनदूषणमित्यर्थः ॥ विशिष्टमिति । (अचेतनव्यावृत्तमि)चेतनाश्रि
तत्वविशिष्टमित्यर्थः पूर्वोक्तःपूर्ववाक्योक्तः॥विशिष्टगतित्वस्यव्यापकमिति । (उपाध्यभावादित्यर्थः)तथाचपक्षेतदभावा
त्तद्व्याप्यगतिरपिमुक्तस्यनोपपद्यतइतिभावः । (दुःखेतत्वशरीरिवृत्तित्वरूपेणापीत्यर्थः)व्याघातानवस्थाद्यापादनस्थलेपसिद्धां
तस्याभावात्क्लेशेनतत्संपादनस्यतत्रकार्यत्वात्कथंचिदित्युक्तं कार्यमस्तुकारणंमास्तु वह्निरस्तुधूमोमास्तु मूकोहमितियदिब्रूषेतर्हि
स्वक्रियाविरोधइत्यादावपसिद्धांतोनहिस्फुटोस्ति । तत्रतत्रहिकार्योद्देशेनतत्तत्कारणेप्रवृत्तिस्तवनस्यादित्यादौप्रवृत्तेःप्रत्यक्षावग

तत्वेनसर्वसंमततयातदभावापादनेपसिद्धांतइत्यादिरूपेणक्लेशेनापसिद्धांतस्यवाच्यत्वादितिभावः । एतेनप्रसंगरूपताकथनेने
त्यर्थः ॥ बाधइति । शरीरिवृत्तित्वरूपव्यापकनिवृत्त्यागतेरपिनिवृत्त्युक्तौबाधइतिवासततोर्ध्वगतिःदुःखहीनेत्याद्यनुमाने
भवद्भिरुक्तदुःखेतत्वरूपप्रत्यनुमानेबाधइतिवार्थः ॥ एतेनेति । गतित्वेनतत्साधनस्यकथनेनेत्यर्थः । तस्मादित्यस्यार्थः जि
नोक्तेति ॥७॥ जिनोक्तमोक्षस्वरूपभंगः ॥ ७ ॥ तत्वज्ञानमिति । अभ्युपैतीत्यन्वयः ॥ अभ्युपगमइति । यद्यपीत्यादि
नाविष्णुकृतत्वांगीकारइत्यर्थः । यद्वाकरणपाटवाद्यभ्युपगमइत्यर्थः ॥ प्रमाणेति । मोहनार्थदानवानामित्यादिप्रथम
स्कंधतात्पर्याद्युक्तप्रमाणेत्यर्थः ॥ अधिक्रियंतइति । अधिपूर्वात्कृञोऽकर्तरिचकारकइतिकर्मणिघञ्प्रत्ययेअचोञ्णितीति
वृद्धौरूपमितिभावः । कर्तृकर्मणोःकृतीतिकर्तरिषष्ठीतिभावेनोक्तं ॥ असुराणामिति । असुरैरधिक्रियमाणत्वादित्यर्थः ॥
पूर्वेणोत्तरेणेति । वेदमार्गेअयोग्यानांवेदमार्गेप्रवर्ततामित्यर्थः । ननुपटुकरणतत्वज्ञानविवक्षावतआप्तत्वादाप्तोक्तंकु
तोनग्राह्यमित्यतआह ॥ एतदुक्तंभवतीति ॥ यथोक्तमिति । प्रथमस्कंधेतृतीयेध्याये । बहिस्तत्वमित्यस्यार्थोज्ञानव्य
तिरिक्तमिति ॥ यस्मिन्निति । मतइतियोज्यं । एवमग्रेपि । निर्देशक्रमबीजमाह ॥ एतेष्विति ॥ प्रमितसकले
ति । शून्यंतुनप्रमितमितितदंगीकारोप्रामाणिकांगीकारइतिप्रमितसकलेत्युक्तं ॥ रूपाद्यपलापेपीति । अ
र्थात्मकनामात्मकप्रपंचापलापेपीतिवाशून्यवाद्युक्तरूपविज्ञानवेदनासंज्ञासंस्काररूपजगदपलापेपीतिवार्थः ॥ अन्यथाव्या

ख्यानमिति । साम्यशब्दस्यैक्यपरत्वेन सर्वानियस्यापरममुक्तिपरत्वेनव्याख्यानंविधायेत्यर्थः । मोहिताइत्युक्तं
मिथ्याज्ञानंनह्यज्ञानमात्राद्भवतीतिमूलकारणमाह ॥ तमोगुणो[६२९।१८]लक्ष्यतइति । लक्षणाबीजमाह ॥ अज्ञानकार
णत्वादिति । अज्ञानंतत्त्वज्ञानाभावः ॥ इति[६२९।१९]वचनादिति । गीतायांचतुर्दशेध्याये सत्त्वात्संजायतेऽज्ञानंरजसोलोभ
एवच । प्रमादेत्यादिमोहिताइति । मिथ्याज्ञानिनइत्यर्थः ॥ [६२९।१४]भिद्यतइतिभेदइति । भिदृविदारणइत्यस्यकर्मणि
घञिपुगंतेतिगुणेभेदइतिरूपसिद्धेरितिभावः । भिन्नोयमित्यर्थः । भावसाधनत्वेनानन्वयादेवमुक्तं । अयमित्यस्यार्थः पदार्थ
समूहइति । एवकारान्वयपूर्वकंशेषंपूरयति ॥ [६२९।१५]शून्यतैवेत्यादि । संवृतेर्ध्वंसेनाकिंचिदित्युक्तं तर्हिमोक्षःकइत्यतआह ॥
[६२९।१६]संवृतीति ॥ वक्ष्यतीति । निर्विशेषंस्वयंभातमित्यादौवक्ष्यतीत्यर्थः । तत्रसंवृतिवर्जितमितिसंवृतिध्वंसोपलक्षितंशून्यं
मोक्षइत्युक्तावप्युपलक्षणार्थंभावनाद्युपयोगइतितत्रैवतात्पर्यात्सवृतिध्वंसोमोक्षइतिवक्ष्यतीत्युक्तं ॥ परसामान्येति ।
सत्ताजातिर्वातद्व्याप्यार्थक्रियाकारित्वादिर्वानेत्यर्थः । ननुसत्वराहित्यमेवासत्वंतथाचसत्वंनेत्युक्त्वाकथमसत्वमपिनेत्युच्यते
व्याघातादित्यतआह ॥ असत्वमभावप्रतियोगित्वमिति ॥ [६२९।२१]नानासंवृतिवर्जितत्वादीति । वर्जितपदेनध्वंसोग्रा
ह्यः ॥ भावनादीति । बौद्धागमश्रवणमननवैराग्याद्युपयोगइत्यर्थः ॥ अज्ञानेति । संवृतीत्यर्थः । आदिपदेनतत्कार्य
निवृत्तिग्रहः । ननुनिर्विशेषादिरूपशून्यस्यकर्तृत्वभोक्तृत्वादिनानावस्थापन्नत्वादिकंकथमित्यतआह ॥ [६२९।२३]एतदुक्तंभवती
ति ॥ परमसूक्ष्मस्येति । अप्रतिघरूपस्येत्यर्थः । यद्वास्थौल्यादिपरिमाणशून्यस्येत्यर्थः । स्वतइतिसर्वत्रानुषज्यते ॥ वा

ज्ञ्नसेति । अचतुरविचतुरेत्यादिसूत्रेणनिपातनात्साधुः ॥ आवरणेति । आवरकशक्तिःस्वरूपाच्छादनशक्तिः । विक्षेपशक्तिःव्यामोहनशक्तिः । नानाविधतयाभासकत्वशक्त्यादिरादिपदार्थः । संवृत्याविलसितोयःकर्तृत्वादिशक्तिमान्योहंकारःसएवोपाधिःतद्वशादित्यर्थः ॥ भावनाप्रकर्षादिनेति । शून्यमहमित्युपासनोत्कर्षेणआदिपदोक्तपआदिनाचेत्यर्थः । शंकते ॥ शून्यमेवचेदिति ॥ इत्यादिकमिति । भावनावैयर्थ्यादिरादिपदार्थः ॥ उपलक्षणेति । संवृतिध्वंसरूपोपलक्षणभेदादित्यर्थः । अनेकधेतिश्रवणादुक्तं ॥ नानाभूतयेति । बहुविधयाप्रातिस्विकरूपयेत्यर्थः । संवृत्त्यैवेत्येवकारान्वयमाह ॥ अवच्छिन्नमेवेति । शब्दितपदस्वारस्यमाह ॥ संवृतेरिति । शब्दितमित्यत्रशेषमाह ॥ भवतीतिशेषइति ॥ व्यावृत्ताभवतीति । शैवालवदितिभावः ॥ अन्येति । अवच्छेदकत्वेनप्रातिस्विकंविद्यमानेत्यर्थः ॥ यदुक्तमिति । एतन्मतोपन्यासक्रमभागेउक्तमित्यर्थः । सत्यत्वादिकंस्वरूपंसदेवव्यावर्तकमितिमनसिनिधायशंकते ॥ अर्थमतमिति । एवकारान्वयेनानुवादः ॥ किमेवमितिमनोगतंशंकते ॥ यथेति । पुनःशंकते ॥ यद्यपीति ॥ अस्त्येवेति । भेदइत्यनुकर्षः ॥ तद्वाचीनीति । अपोहवादिमतइवासस्यादिव्यावृत्तिवाचीनिवेत्यर्थः ॥ सकलमपीति । यद्यपीत्यादिनोक्तमित्यर्थः ॥ अंगमिति । स्वरूपंनधत्तइत्यर्थः । आदिपदार्थःतस्मादित्यादि । निर्भेदत्वमित्यादिनावक्ष्यमाणतत्वमस्यादिवाक्यार्थनिर्वाहोपीत्यर्थः ॥ वेदइतिवर्ततइति । विभक्तिविपरिणामेनानुवर्ततइत्यर्थः । कथ्यतइत्युक्तं

तत्कुत्रेत्यतस्तद्वाक्यंपठति ॥ **अविद्यावदिति** । नन्वनुभूतिःप्रमाणमितिमतेशुक्तिरूप्यज्ञानस्याप्यनुभवत्वात्तत्संग्रहःकृतइ
तिभातीत्यतआह ॥ ([६३१।९] **अतत्वावेदकाभावाभिमानेनेति** । अनुभूतिरिति । नन्वनुभूतिप्रमाणमितिप्रमाणलक्षणंप्रणय
ताऽतत्वावेदकस्यापिप्रामाण्यमंगीकृतमित्यन्यथार्थाज्ञानव्यावृत्त्यर्थविशेषणमुपाददेत् । नचैवं । तस्मात्कथमतत्वावेद
कव्यावृत्तयेप्रयततएवेत्युक्तमित्यतआह) ॥ [६३१।१०] **अतत्वावेदकव्यावृत्तयइति** ॥ **प्रयतंतएवेति** । ज्ञानमात्रस्यप्रमात्वा
भ्युपगमादितिभावः । तदेवव्यनक्ति ॥ **अनुभूतिरित्यादिना** ॥ [६३१।१२] **व्यर्थमेवेति** । प्रामाण्यार्थनिर्दोषताव्युत्पादनायनि
त्यत्वकथनं । प्रामाण्यस्यैवाभावेतद्व्युत्पादनंव्यर्थमेवेत्यर्थः ॥ [६३१।१३] **यस्येति** । ज्ञानस्येत्यर्थः ॥ [६३१।१८] **विशेषाभावेपीति** । बाध्यत्वा
विशेषणेतिभावः ॥ **तद्धेतुकेति** । दीर्घभ्रांतिकरणत्वहेतुकेत्यर्थः । ब्रह्मज्ञानबाध्यवेदाप्रामाण्यहेतुकेतिवार्थः ॥ **वर्णदैर्घ्या**
[६३१।२१] **दिज्ञानमिति** । तन्मतेतस्यभ्रांतित्वात्तस्यचलौकिकत्वेनब्रह्मधीबाध्यत्वाभावादल्पकालानिवर्त्यभ्रांतिहेतुत्वस्याविवक्षित
त्वेवर्णदैर्घ्यादिभ्रांतिरूपज्ञानंकथमुदाहरेदित्यर्थः ॥ **एवंविधमिति** । अल्पकालानिवर्त्यभ्रांतिहेतुकत्वरूपंवाशून्यज्ञानबा
ध्यविषयकत्वरूपंवेत्यर्थः । शंकते ॥ [६३१।२२] **नसर्वस्यापीति** ॥ **विधीति** । यजेतस्वर्गकामःब्राह्मणोनहंतव्यइत्यादिविधिप्रतिषे
धविषयस्येत्यर्थः ॥ **निर्विशेषत्वमिति** [६३२।३] । निर्विशेषमवांतरवाक्यार्थइत्युक्तेरितिभावः । मूलेअसत्वपदेनाभावप्रतियोगित्व
ग्रहइतिभावः ॥ [६३२।६] **इत्यादितत्प्रसिद्धिमिति** । अनृतजडविरोधिरूपमंतत्रयमलबंधनदुःखताविरुद्धं । अतिनिकटमविक्रियं

मुरारेःपरमपदंप्रणयादभीष्टवीमीतिभाष्यकारीयमुरारिशतकगतश्लोकोयं । शून्यपक्षेपिकुतस्तत्समित्यतःस्वयंहेतुमाह ॥
[६३२।७] **जाड्येति** । ततइत्यनुवादः । व्यावर्तकाभावादितिव्याख्या । कःस्वपक्षःकुत्रतत्साधनंतावताकथंदूषणमित्यतआह ॥
[६३२।१२] **एतदुक्तंभवतीति** ॥ [६३२।१३] **पृथगुपदेशादित्यादिनेति** । अतएवचोपमेत्यादिरादिपदार्थः ॥ **तस्येति** । अद्वैतस्येत्यर्थः ।
[६३२।१४] **नाभावइतीति** । प्रपंचोऽभावोनध्वस्तोनसत्त्वेनप्रमीयतेमानत्वादितिसमयपादीयसूत्रार्थः ॥ **सप्रभेदमिति** । एकजीव
बहुजीवप्रभेदसहितं ॥ [६३२।१५] **साधारणदोषेणेति** । एकजीव(वाद)बहुजीव(वाद)साधारणेत्यर्थः ॥ **प्रदीपस्येवेति** । प्रदीपस्य
यथानिर्वाणशब्दितोनिःशेषविनाशस्तथाभाविनःशून्यमहमस्मीतिध्यायतःसविलाससंवृतिनाशरूपनिःशेषनाशेतदवच्छिन्नपु
द्गलशब्दिताहमर्थरूपजीवस्यापिविनाशइत्यर्थः । अनात्मसंबंधित्वेनापिसंभवात्कथमाक्षेपइत्यतआह ॥ [६३२।१७] **एतदुक्तमिति** । फ
लिनःफलभोक्तुरित्यर्थः ॥ [६३२।१८] **अनात्मनोपीति** । तदीयशून्यभावनातिशयेनमूलकारणसंवृत्तेःस्वकार्येणसहविनाशादितिभा
वः ॥ [६३२।१९] **अपुरुषार्थत्वेति** । पुंसंबंधिनएवपुरुषार्थत्वादपुरुषसंबधीकथंपुरुषार्थःस्यादित्यर्थः ॥ **अयमिति** । मोक्षइत्यर्थः ।
अवधिपदस्यार्थःपर्यंतइति ॥ [६३२।२३] **आश्रयइति** । उपकार्यइत्यर्थः । ननुत्यजेदेकंकुलस्यार्थइत्यादेःमहानिष्टनिवृत्तयेऽल्पत्यागो
दृष्टइत्यतआह ॥ [६३२।२४] **तद्विघातेपिवेति** । शंकते ॥ [६३२।२६] **रोगादीति** । देहात्मभेदज्ञानहीनाएवनसंत्यतोपितेनात्रोदाहरणमित्याह ॥
[६३३।२] **उपपादितंचेति** । जातमात्राम्रतागावोहस्तिनःपक्षिणोझषाः । इत्यादिनाभक्तिपादेउपपादितमित्यर्थः ॥ [६३३।५] **वेदनादिकमि**
ति । वेदनंज्ञानंआदिपदेनशरीराद्यभिमानःकंटकवेधादिश्चग्राह्यः । **कर्मणीति** । अप्रारब्धप्रारब्धरूपे । (किंविनिगमक

मिति)कुतोविनिगमनमिति । मदुक्तभवदुक्तयोरात्मनात्मनाशयोरितियोज्यं । नियामकांतरमाह ॥ [६३३।७] विप्रकृष्टेति । एवंचदेहादिव्ययेनदुःखनिवृत्तिरूपसाध्यासिद्धौसत्यांखल्वात्मव्ययएष्टव्यः । देहादिव्ययेनदुःखनिवृत्त्यसिद्धिर्नेत्युपपादितमित्यात्मव्ययस्तदर्थंनेष्टव्यइतिभावः ॥ आत्मार्थइति । त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् । ग्रामंजनपदस्यार्थइति पूर्वशेषोभारते ॥ [६३३।८] आत्मावधिकस्यैवकारणस्येति । आत्मपर्यंतविद्यमानंयद्दुःखकारणमनात्मरूपंतस्यमोक्षोविनाश इत्यर्थः । अस्मदभिमतेत्युक्तंव्यनक्ति ॥ [६३३।९] आत्मव्यतिरिक्तानामिति ॥ [६३३।११] शून्यतेति । देहेंद्रियाहंकाराद्यपगमे शून्यतापत्तेरेवप्राप्तेरेवंपर्यवसानमितिभावः ॥ घटशून्यतेति । घटनाशेघटस्यशून्यभावोस्तीतिघटरूपशून्यतेत्यर्थः । [६३३।१३] भावार्थेति । विश्वाकारंचसंवृत्त्यायस्यतत्पदमक्षयमितिचतुर्थपादस्थयस्येत्यस्यान्वयेनानुवादोनतत्वतोयस्येति ॥ घटश्चेति । नष्टइत्यन्वयः ॥ [६३३।१४] ताविति । आत्मघटौ ॥ [६३३।२२] अस्यैवरूपस्येति । अहमित्येवंरूपस्येत्यर्थः ॥ उपपादितत्वादिति। मानभूवंभूयासमित्यादिनाअहंमाभूवंसत्ताहीनवान्नभवामीतिव्यतिरेकनिरासः । भूयासंसर्वदासत्तावान्स्यामिति अहमर्थस्यलौकिकानामसत्वनिवृत्तिपूर्वसत्वाशंसनोपदर्शनेनोपपादितत्वात्परेणेत्यर्थः ॥ [६३३।२३] तदप्यस्तीति । निर्विकारंवस्त्वित्यर्थः । अहमर्थस्यैवेष्टत्वंव्यनक्ति ॥ [६३३।२४] आशासनंचेति । आशासनकर्तृचेत्यर्थः । नन्वाशंसनकर्ताहमर्थःप्रेमास्पदनिराकारार्थमेवा शास्तइत्यस्त्वित्यतआह ॥ नचान्यस्येति ॥ [६३३।२६] लोकइति । तृणधान्यरूपमहाफलहेतोरल्पवित्तव्ययस्येष्टत्वरूपदर्शनादितिभा

वः । नापिशून्यतापत्तिरित्यादिनायत्स्वमतेपुमर्थत्वोपपादनंपूर्वत्रकृतंतन्निराह ॥ ब्रह्मभावश्चेति ॥ उपपादितमिति । निर्विशेषत्ववाचैवशून्यंब्रह्मेतिनोभिदेत्यादिग्रंथेनब्रह्मशून्ययोर्भेदाभावोपपादनेतिभावः ॥ [६३४।३] उक्तमेवेति । सच्चित्सुखादिकंचे त्यादिग्रंथेन । तथा नचदुःखविरोधित्वादन्याद्यानंतदेत्यादिनाचेतिभावः । तमनुभूयासंआनंदानुभववान्स्यामित्यर्थः । नि र्विशेषत्वेकुतोवैशिष्ट्याद्ययोगइत्यतआह ॥ [६३४।५] यद्वीति । कर्मत्वंवाकर्तृत्वंवाभिप्रेतमितिभावेनविकल्प्यनिराह ॥ अविद्याव रणेति ॥ नो[६३४।६]भावपीति । अनुभवितुरन्यस्येत्युक्तदिशाकर्मत्वस्य स्वस्मिन्नित्यादिनोक्तरीत्याकर्तृत्वस्यायोगेनसकलकार कशक्तिविधुरतायोगेनवाऽनंगीकारादित्यर्थः । शंकते ॥ प्रदीपइति । तत्रैकस्यैवकर्तृत्वकर्मत्वविरोधात्परप्राकाश्यत्वाभावमा त्रेणप्रकाशतइत्युक्तिस्तथात्रापीतिभावः ॥ [६३४।७] भास्वररूपेति । परप्रकाशकंरूपंभास्वररूपंतद्वानित्यर्थः ॥ तदिदमिति । किंचा नंदत्वमपीत्यादिनैतत्पर्यंतमुक्तंप्रमेयमित्यर्थः । मोक्षःस्याद्घटशून्यतेत्युक्तातिप्रसंगपरिहारशंकानिरासकतयामूलमवतारयितुंशं कामाह ॥ ननुनिर्विशेषामित्यादिना । ननुतर्हिशून्यतेतिभावार्थेतस्यभावस्त्वतलावित्युक्ततल्प्रत्ययःकथमित्यतआह ॥ तल्प्रत्ययइति ॥ [६३४।८] अतिप्रसंगइति । घटशून्यतामोक्षःस्यादित्युक्तातिप्रसंगइत्यर्थः । विवक्षितायाअपीतिआत्मशून्यताया अप्येवमेवेत्यर्थः । तद्व्यनक्ति ॥ [६३४।९] आत्मशून्यतेति ॥ [६३४।१०] केनचिदभिसंधिनेति । व्यवहारमात्रेणैवविशेषितत्वंवस्तुतोनिर्वि शेषत्वमेवेत्यभिप्रायेणेत्यर्थः । यदीत्यस्यावैयर्थ्यायाह ॥ [६३४।११] स्यादित्यर्थइति । (घटाभावस्यसविशेषत्वात्अविशेषत्वो)घटशू

न्यतायाअविशेषत्वमनभिधायघटाभावस्यनिर्विशेषत्वोक्तिरयुक्तेत्यतआह॥ भावशब्दइति। भवतीतिभवनकर्तृत्वेविवक्षिते भवतेश्चेतिसूत्रेणणप्रत्ययेवृद्ध्यावादेशयोःकृतयोर्भावेतिरूपसिद्धेर्भावःसन्अभावोसन्घटरूपोसन्नष्टेघटःघटशून्य(भावोपी) तापीत्यर्थः । तथाचसिद्धमर्थमाह ॥ एवंतर्हीति। अस्फुटत्वादाह ॥ ततश्चैतदुक्तं[६३४।१३]भवतीति ॥ [६३४।१५]अप्राप्तस्त्विति। निरूपणाभावदशायामित्यर्थः ॥ उक्तरूपइति। अहमर्थात्मकात्मविनाशरूपइत्यर्थः ॥ उभयेति । वादिनस्तवप्रतिवादिनो ममचेत्यर्थः ॥ [६३४।१८]वक्ष्यामइति । नचमायीवदेदत्रेत्यादिनेतिभावः ॥ यथोक्तमिति ।शून्यवादिनोक्तमित्यर्थः । आत्मातैर्दे हेंद्रियादिभिःविनाकेवलोदुःखहेतुर्नभवतीतितत्रैववैराग्यंकार्यमितिचेत्तर्हितेपिदेहादयोपि।तादृशाआत्मनाविनाकेवलाःदुःख हेतवोनभवंति। एवंप्रत्येकंद्वयमपिनिर्दोषंदुःखहेतुर्नभवतीत्युभयत्रापिवैराग्यंनकार्यमित्यर्थः॥ यद्यन्योन्यसहायेनद्वयमपिदुः खहेतुस्तर्हिद्वयोरात्मनिदेहेंद्रियादौचोभयत्रततोदुःखहेतुत्वाद्वैराग्यंकार्यमित्यात्मनाशःपुरुषार्थएवेतिभावः ॥ [६३४।२०]विमतइति। मूलानुवादः ॥ [६३४।२१]उक्तेति। नतावदत्रेत्यादिनोक्तविधयेत्यर्थः॥ [६३४।२२]श्रुतिसद्भावेनेति। अशरीरंवावसंतमित्यादिश्रुतीत्यर्थः॥ श्रुत्यैवेति। स्वरूपेणाभिनिष्पद्यतेब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुत्यैवेत्यर्थः॥ [६३४।२६]सर्वधर्मेति । भक्तिपादे॥ [६३५।१]तदभिमतेति । ब्रह्मभावापत्तिरूपमोक्षवादिनीकानिचेन्नेत्यपिग्राह्यमित्यर्थः। ननुप्राकृतस्याभावेपांचभौतिकमस्तिकिमित्यतोनेतिभावेनाह॥ ॥४७९॥ [६३५।३]प्राकृतशब्देनेति । भावंजैमिनिर्विकल्पाम्नानादितिसूत्रेकदाचिन्मुक्तानांभोगार्थंचिन्मात्रदेहान्यशुद्धसत्त्वात्मकप्राकृतदेह

भावंजैमिनिर्मन्यतइतिमुक्तानांप्राकृतदेहसत्त्वस्यांगीकारात्कथमेवमुक्तिरित्यतआह ॥ तद्राहित्यंचेति । पांचभौतिकस्य सर्वात्मनाऽभावेपिउक्तरूपप्राकृतदेहस्यकदाचिद्भोगार्थमिच्छयोपादानंतस्येच्छयापरित्यागइत्येवमैच्छिकंकादाचित्कंतद्राहि त्यंनतुसर्वथेतितत्रोक्तंध्येयमित्यर्थः। ननुतदभिमतमोक्षवादिनांकाचिच्छ्रुतिर्नेत्यपिग्राह्यमितिप्रागुक्तिरयुक्ता ब्रह्मवेदेत्यादिश्रु तेर्भावादित्यतआह॥ [६३५।४]एवंब्रह्मेति । ब्रह्मभवतिस्वरूपज्ञानानंदादिनाबृंहितोभवतीत्यादिरूपेणव्याख्येयेत्यर्थः॥ [६३५।६]परकीये ति । आत्मशून्यतापुरुषार्थइतिप्रागुक्तानुमानस्यनमोक्षोविमतइतिप्रागुक्तप्रतिपक्षापेक्षयाप्रतिपक्षांतरमित्यर्थः। शून्यमा यिनोरित्यत्रशून्यपदेनशून्यवादीग्राह्यइतिभावेनाह॥ [६३५।७]शून्यशब्देनेति । एतत्पक्षेविग्रहंदर्शयति॥ [६३५।८]शून्यश्चेति। अस्मा यामेधास्रजोविनिरितिमायावीतिभाव्यंमायीतिकथमित्यतआह॥ व्रीह्यादिलक्षणइति । पंचमस्यद्वितीयपादेअतइनिठ नावितिप्रकरणे व्राह्यीदिभ्यश्च व्रीह्यादिगणस्थशब्दानांमकारांतत्वाभावेपिमत्वर्थइनिप्रत्ययोभवतीत्युक्तेर्व्रीह्यादिनिमित्तकेनि प्रत्ययइत्यर्थः। ननुव्रीह्यादिगणस्थकेवलमायाशब्दाद्विहितःशून्यमायाशब्दात्कथंभवतीत्यतआह॥ तत्रचेति। वनमाली त्यादिप्रयोगात्तदंतविधिरेष्टव्यः। वृत्त्यादावनुक्तत्वेपिप्रयोगवशात्तदंतविधिरितिग्रंथकारैरेवोच्यतइतिज्ञेयं ॥ प्रतिपक्षांत [६३५।११]रसमुच्चयार्थइति । पूर्वोक्तप्रतिपक्षाभ्यांअस्यसमुच्चयार्थइत्यर्थः॥ [६३५।१४]अन्यथासिद्धिश्चानुमानस्येति । आत्मशून्यतापुरु षार्थः दुःखनिवृत्त्युपयोगित्वादितिप्रागुक्तानुमानस्यअन्यथादेहादिनाशरूपप्रकारांतरेणापिदुःखनिवृत्तेरात्मशून्यतायादुःख

निवृत्त्युपयोगित्वस्यासिद्धिरित्यर्थः॥तेनसाध्येनविनाहेतोरन्यथोपपत्तेरनुक्तेःकथमन्यथासिद्धत्युक्तिरितिशंकानवकाशः।यद्वा
पुरुषार्थपदेनदुःखाभावत्वग्रहः । तथाचदुःखाभावत्वस्यात्मशून्यतायादुःखनिवृत्त्युपयोगित्वाभावेप्युपपत्त्यासाध्यस्यहेतुनावि
नापियोगादन्यथासिद्धिरित्येवंयोज्यं ॥ [६३५।१५] निर्दुःखतामिति । दुःखानुत्पत्तिप्रतीत्यर्थः । तथाचदृष्टांतःसाधनविकलइति
भावः॥ [६३५।१६] असिद्धत्वेनेति।मानाभावादितिभावः॥ [६३५।१७] भोगश्रुतिरिति।जक्षन्नित्यादिप्रागुक्तश्रुतिरित्यर्थः॥ [६३५।१८] इत्युक्तेति। पूर्व
वाक्योक्तेत्यर्थः।प्रागुक्तप्रतिपक्षानुमानेपिदोषमाशंक्य प्रतिबंद्योत्तरमाह॥ निर्दुःखत्वादिति॥ [६३५।१९] उक्तत्वादिति। नदुःखानुभ
वःक्वापिमिथ्यानुभवतांव्रजेदित्यादिनापृथगधिकरणेउक्तत्वादित्यर्थः। श्रुत्यादिनिरोधआदिपदार्थः। ननुबहुजीववादेएकस्यमु
क्तावप्यन्यस्यदुःखवतःसत्वेनदुःखाच्छेदराहित्यमसिद्धमित्यतआह॥ बहुजीवेति॥ [६३५।२०] तदेतदिति। किंचिद्दुःखाभावस्येत्यादिनो
क्तंसर्वमित्यर्थः।शून्यवादिमायावादिभिरभिमतमोक्षनिरासः॥७॥ [६३५।२३] पूर्वकौपूर्वोक्तावित्यर्थः॥ [६३५।२४] तसिरिति। आद्यादिभ्यउप
संख्यानंइत्युक्तेराद्यादेराकृतिगणत्वादितिभावः ।ननुवैषम्यात्कथमतिदेशइत्यस्यनानेनोत्तरमित्यतोव्यनक्ति ॥ [६३५।२५] इदमुक्तमि
ति॥ [६३६।४] यथोक्तमिति।समयपादीयानुव्याख्यानेतत्रसंततिभेदश्चस्वभेदोभेदएवच। कल्पिताइत्यादिनाएतन्मतानुवादप्रस्ता
वेउक्तमित्यर्थः ॥ [६३६।५] स्पष्टइति । एतादृशानांपक्षाणांदूषणंप्रभुणाकृतमित्यादिनोक्तदोषाणामत्रापियोजयितुंशक्यत्वादित्य
र्थः । तादृङ्मोक्षरूपतेतिबहुव्रीहिरित्याह ॥ [६३६।६] तादृङ्मोक्षरूपमिति । अद्वितीयज्ञानतादात्म्यरूपमित्यर्थः । शंकते ॥ ज्ञा

नेति ॥ [६३६।८]यस्तुविशेषइति । कल्पितद्वितीयाभावरूपःसंसाराद्विशेषोयइत्यर्थः॥ [६३६।९]परेणेति । प्रतिवादिनेत्यर्थः । साध्यधर्मविशिष्टःपक्षइत्याचार्योक्तेःसाध्यविशिष्टस्यसाध्यवैशिष्ट्यसाधनेआत्माश्रयापत्तेराह ॥ [६३६।११]पक्षशब्देनेति ॥ [६३६।१४]प्रतिज्ञाहानिरिति । येनयद्यथाप्रतिज्ञातंतत्रदूषणेप्राप्तेतेनैवतस्यतथापरित्यागःप्रतिज्ञाहानिरितितल्लक्षणादितिभावः ॥ [६३६।१५]निग्रहेति । निग्रहस्थानेनप्राप्तपराजयमात्रेणेत्यर्थः । विरुद्धमपितत्वंव्यवतिष्ठतांकोदोषइत्यतआह ॥ माहिभूदिति । सदनुमानत्वमित्यन्वयः ॥ सदनुमानत्वंमाभूदित्येतदर्थंविरुद्धंतत्वंव्यवस्थितमितिनाभ्युपेयमित्यर्थः । अन्यथातदपिसदनुमानंप्राप्नोतीतिभावः ॥ प्रतियोग्यधि[६३६।२०]करणमेवह्यभावस्याधिकरणमिति । पूर्वोत्तरकालभेदेनेतिभावः ॥ नचेति । आत्माश्रयापत्तेरितिभावः । ननुसाक्षीमुक्तौकालसत्वंकथंगृह्णातियेनतद्विरोधइत्यतआह ॥ [६३६।२३]सहीति । उक्तवादिनामित्यत्रोक्तपदार्थमाह ॥ [६३६।२४]उक्ताःप्रत्युक्ताइति । निरस्तवादिनामित्यर्थः । शंकते ॥ शून्यवादिमायावादिनौप्रतीति ॥ [६३७।४]तस्येति । विरोधाभिधानस्येत्यर्थः । ताभ्यांभवदुक्तानुमानेविज्ञानवादिनेवाश्रयासिद्धेरनाशंकितत्वादप्रस्तुतत्वादित्युक्तं । अस्पष्टत्वाच्छंकोत्तरस्यस्वयमभिधेयंव्यनक्ति ॥ [६३७।५]अयमभिसंधिरिति ॥ [६३७।९]पूर्वोक्तमेवेति । विमतःकालोनकेवलज्ञानवानित्युक्तमित्यर्थः ॥ तस्याप्यद्वितीयार्थनिरासएवतात्पर्यादितिभावः ॥ [६३७।१०]द्वयोरिति । अनुमानयोरित्यर्थः ॥ प्रयोजनंचेति । मुक्तावद्वितीयनिरासरूपमित्यर्थः ॥ [६३७।१३]नसइति । शब्दानुगमादृतेतयःप्रत्ययःसनास्ति सर्वंशब्देनानुविद्धमिवज्ञानंगम्यतेऽनुभूयतइत्यर्थः ॥ ईश्वरैक[६३७।१४]त्वमीश्वरेणजीवानामेकत्वं ॥ [६३७।१६]इत्यादिदोषोपीति । अनुमानवि

रोधानुभवविरोधादिरादिपदार्थः ॥ **अनुमानंत्विति** । सर्वंकालेशब्देईश्वरेवाऽरोपितंतदनुविद्धतयाप्रतीयमानत्वादिदं
रूप्यमितीदमाकारानुविद्धतयाप्रतीयमानरजतवदितिप्रागभिमतानुमानंत्वित्यर्थः । आगमोपिशैवागमोपिअद्वैतबोधकांशःप्र
त्यक्षादिविरोधाद्दुष्टइत्यर्थः । शून्यवादिमायावादिविज्ञानवादिकालशब्देश्वरैकत्ववाद्यभिमतमोक्षनिरासः ॥ ७ ॥ **तस्ये**
ति । स्वतोनिर्विषयकक्षणिकज्ञानाख्यात्मनइत्यर्थः ॥ **विषयोपरक्तस्येति** । विषयसंबंधविशिष्टस्येत्यर्थः ॥ **ईर्त्यादिरिति** ।
विमतःकालःप्रपंचवान्कालत्वादिदानींतनकालवदित्याद्युक्तानुमानमादिपदार्थः ॥ **प्रागेवसमर्थितमिति** । प्रत्यक्षवच्चप्रामा
ण्यंस्वतएवागमस्यहीत्यत्रजिज्ञासाधिकरणेसमर्थितमित्यर्थः । वैशेषिकसौत्रांतिकाभिमतमोक्षनिरासः ॥ ७ ॥ **चशब्दइति** । अ
युक्तवादिभिःसमुच्चित्यनिर्देशेसति तएवैतेपितथेतिलभ्यइत्याह ॥ **यथापूर्वइति** । तत्रेत्यनुवादः। मुक्ताविति व्याख्या ॥ **सुप्ति**
प्रलयेति । ननुसुप्त्यादावपिसूक्ष्मरूपेणाप्यनवस्थानात्सर्वात्मनालयोस्त्येवेत्यतस्तस्यार्थमाह ॥ **निवृत्तेति** । निवृत्तंयदिच्छादित
ज्जीतायस्येच्छाद्यंतरस्यानुत्पादइत्यर्थः । सुप्त्यादौतुअस्त्युत्तरकालंतदुत्पादइतिभावः । ननुसुखाभावंप्रतीच्छादेरभावस्यकथंहेतु
तासुखस्यानादित्वेनाप्युपपत्यातदुत्पत्तेरभावेनोत्पत्ताविच्छादेरनुपयोगादित्यतआह ॥ **अयमाशयइति** ॥ **मूर्तत्वाभावेनेति** ।
परिच्छिन्नपरिमाणयोगित्वाभावादित्यर्थः । तादृशस्यैवघटादेःपटादिनाऽऽवृतत्वदर्शनादितिभावः । रूपादेरंधकारावृतत्ववत्किं ॥४८१॥
नस्यादित्यतआह ॥ **तदनिरूपणाच्चेति** । ज्ञानाभावातिरेकेणावरणस्यानिरूपणाच्चेत्यर्थः । एवमनादित्वंसुखतत्प्रतीत्योर्नि
रस्योत्पत्तिमापाद्यमुक्तौसुखाभावेइच्छाद्यभावस्यहेतुतांव्यनक्ति ॥ **ततःसुखस्येति** । अनादित्वासंभवादित्यर्थः ॥ **सर्वत्र**

विजयतइति । शरीरेंद्रियादिरूपोक्तकारणसमूहेप्रतिकारणंअदृष्टमपेक्ष्यतएवेत्यर्थः । हेत्वभावेनसुखाभावंमुक्तावुपपाद्येदा
नींपुमर्थत्वंतस्यदूषणसौकर्यायव्यनक्ति ॥ **कथमयमिति** । सुखहीनोमोक्षइत्यर्थः । षडिंद्रियाणिघ्राणरसनचक्षुःश्रोत्रत्वक्म
नांसि गंधरसरूपशब्दस्पर्शाआत्माज्ञानादिश्चेतिषड्विषयाःएतद्विषयकज्ञानानिषड्बुद्धयः । शंकते ॥ **दुःखमनिवृत्तिरि**
ति ॥ **सोपाधिकत्वादिति** । सुखोपाधिकत्वादित्यर्थः । तदेवव्यनक्ति ॥ **सुखमिति** ॥ **भोजनादिसुखेइति** । तज्ज
न्यसुखेसत्येवेत्यर्थः । बुभुक्षादिदुःखंतज्जन्यदुःखमित्यर्थः ॥ **क्वचिदिति** । परवनितादौ ॥ **क्वचित्सुखाभावेपीति** । वि
ष्टिगृहीतपुरुषप्रवृत्त्यादौसुखाभावेपितात्कालिकराजोपद्रवदुःखनिवृत्तेरिष्यमाणत्वदर्शनादितिभावः । शंकते ॥ **भवतिदुः**
खहानिनिरित्यादिना । विषादिजन्यमोहावस्थायांदुःखनिवृत्तिरितिपररीत्यानुवादः । सिद्धांतेतत्रापिदुःखसत्वस्यमुग्धेर्ध
संपत्तिरित्यत्रोक्तत्वात् ॥ **पुरुषार्थत्वाविरोधादिति** । दुःखहानीच्छयालौकिकैःक्रियमाणस्यप्रेक्षावदननुष्ठानमात्रेणपुरुषा
र्थत्वंनविरुध्यतइत्यर्थः ॥ **नतत्रकामइति** । काम्यमानंसुखमित्यर्थः । पुमर्थत्वेकुतोनिवृत्तिःप्रेक्षावतामित्यतआह ॥ **अपि**
त्विति ॥ **महीयानिति** । अनर्थइत्यनुषंगः ॥ **प्रवर्तंतइति** । जायतइत्यर्थः ॥ **नतइति** । प्रेक्षावंतइत्यर्थः । अल्पा
नर्थनिवृत्त्युद्देशेनापिकुतोनप्रवर्तंतेप्रेक्षावंतइत्यतआह ॥ **इयमेवहिप्रेक्षेति** । ननुप्रेक्षावदप्रवृत्तिमात्रेणापुमर्थत्वमेवकुतोने
त्यतआह ॥ **स्वरूपेणेति** । जनैरितियोज्यं ॥ **आत्यंतिकीति** । एकविंशतिदुःखनिवृत्तिरित्यर्थः । अवर्तमानेनेतिपदच्छे

दः । अतीतेत्यर्थः । अचिरमल्पकालमित्यर्थः ॥ [६३९।५] तथात्वइति । प्रसक्तकंटकनिवृत्तेरनुभूयमानत्वेनपुमर्थत्वेसदातन्निवृत्तेर्भा
वेनसदातन्निवृत्तेरनुभवप्रसंगापत्त्याविषयांतरज्ञानानवकाशःस्यादित्यर्थः । इतिपदस्यायमाशयइतिपूर्वेणान्वयः । सांख्या
दिमतानुवादः ॥ ७ ॥ [६३९।७] उदाहरिष्यंतइति । पुनरानंदपूर्वकान् । धर्मानाहाप्यनुच्छिन्नानित्यादाविति भावः ॥ [६३९।१०] विभागेने
ति । प्राकृतदुःखंनास्त्यप्राकृतंत्वस्तीतिविभागेनेत्यर्थः ॥ [६३९।१२] विशेषेति । वैषम्येणपदद्वयव्याख्यानेविशेषहेत्वभावादित्यर्थः ।
विशेषाभावात्विभागेनव्याख्यातव्येत्यस्यकिमनेनोत्तरमुक्तमित्यतआह ॥ एतदुक्तमिति । अविभागेनव्याख्यानेमुक्तेःपुम
र्थत्वयुक्तिरुक्ताभवति । ननुसुखदुःखयोरविनाभावाद्दुःखाभावार्थंसामस्त्येनसुखहानिःकथमनिष्टैवेत्यतआह ॥ [६३९।१६] तथाचवक्ष्या
मइति । आत्मप्रियहानायकोयतेतचबुद्धिमानित्यत्रेतिभावः ॥ [६३९।२२] योदोषइति । शरीरेंद्रियादिरूपकारणाभावाख्यदोषइत्य
र्थः ॥ [६३९।२३] यदत्रोक्तमिति । नतावन्मुक्तस्यसुखमनादीत्युपपद्यतेसंसारेपितत्प्रतिभासप्रसंगादित्यादीत्यर्थः । तदनिरूपणाच्चेत्युक्त
दोषंनिराह ॥ आवरणंचेति । मूर्तत्वाभावेनेत्युक्तदोषंनिराह ॥ [६३९।२४] नचविशदेति । किमावरणकृत्यमित्युक्तंपराचष्टे ॥ ज्ञानस्ये
ति ॥ [६३९।२५] नचोक्तदोषइति । निर्विषयायाइत्युक्तदोषइत्यर्थः ॥ [६४०।५] इतिश्रुतिमिति । भाष्योक्तां ॥ [६४०।६] वृत्तीनामिति । मनःपरिणति
रूपाणामित्यर्थः । श्रौतपदानामर्थमाह ॥ परमात्मेति ॥ सज्जीवइतिवेति । तस्यपरमजीवत्वेनपरमात्मपदेनोक्तिसंभवादिति ॥४८२॥
भावः ॥ [६४०।७] उभयेति । सुखदुःखाद्युभयस्वभावाइत्यर्थः । अत्रमनुष्यपदेननित्यसंसारिणोग्राह्याइतिभावः । मूलयोजनामाह ॥ अ

सुरानैवमित्यादिना । प्रियासृष्टिरितिपदच्छेदः ॥ [६४०।११] सूचितत्वादिति । प्रियंस्वरूपमेवास्यबलानंदादिवाक्यतइत्यत्राप्राकृतसु
त्यर्थः खरूपत्वस्योक्त्यासंकोचेनियामकस्यसूचितत्वादितिभावः । यद्वाहेयत्वादप्रियस्यैवप्रियहानेरनिष्टतइत्यत्रमुक्तेःपुमर्थत्वभंग
रूपस्यनियामकस्यसूचितत्वादित्यर्थः॥ आत्माचेति । आत्मरूपंप्रियमित्यर्थेकर्मधारयोयं । षष्ठ्यंतविग्रहेणप्राप्तमर्थमुपपाद्यक
र्मधारयविग्रहकृतौतात्पर्यमाह॥ [६४०।१२] वृत्तिरूपेति । इच्छादिकमिति । प्रयत्नआदिपदार्थः ॥ [६४०।१३] श्रुतीति । बलमानंदओजश्चेति
श्रुत्यानित्यानंदोनित्यज्ञानइत्यादिश्रुत्याचसिद्धत्वादित्यर्थः॥ कारणैक्येति । प्राकृतदेहेंद्रियाद्यैक्येइत्यर्थः । अशक्यंचात्मरूप
प्रियहानरूपमित्युक्तंतत्कथमित्यतःआत्महानेनविनातदभिन्नसुखहानमशक्यमितिभावेनात्महानंपराकरोति ॥ [६४०।१४] आत्महानंख
ल्विति । यद्वासुखस्येतियोज्यं । स्वरूपसुखस्यात्मपरित्यागइत्यर्थः ॥ नित्यत्वादिति । अनादित्वाच्चेत्यपिग्राह्यं ॥ [६४०।१५] वियोगे
ति । आत्मस्वरूपसुखस्यआत्मनावियोगलक्षणं स्वात्मनीति । जीवाणुत्ववादिनामस्माकंमतेस्वात्मनिक्रियोत्पत्तौतदभिन्नसुख
स्यवियोगोभवति।नचस्वस्मिन्नेवस्वरूपसुखवियोगजनकक्रियायुक्तास्वस्मिन्स्वावधिकक्रियायाविरोधादित्यर्थः। केचित्त्वात्महा
न्यनुपपत्तिपरतयैवग्रंथार्थमुपेत्यवियोगपदस्यात्मनैवात्मनोवियोगेत्यर्थःस्वात्मनीत्यस्यस्वावधिकक्रियायाःस्वस्मिन्विरोधादि
त्यर्थइत्याहुः॥ [६४०।१६] श्रुत्युक्तोपपत्तिरिति । अशरीरित्वयुक्तिरित्यर्थः । शरीरस्यवृत्तिरूपसुखंप्रतिहेतुतयास्वरूपसुखेहेतुत्वाभावा
दशरीरत्वयुक्तिर्जन्यसुखाभावेयुज्यते । नस्वरूपसुखाभावेस्वरसा । तस्मात्स्वारस्यानुरोधाद्विशेषनिष्ठैवव्याख्येयेत्यर्थः । अप्रि
यंतुसतामजन्यंनेत्यप्रियश्रुतिर्विशेषनिष्ठानव्याख्यातुंशक्येतिसायुक्तिरप्रियेसर्वात्मनानिषेधएवश्लिष्यतइतिभावः॥ अशरीरंवा

वेतिश्रुत्यर्थः ॥ ७ ॥ श्रुतिर्वक्तीति । काण्वश्रुतिर्द्वितीयेध्यायेवक्तीत्यर्थः । इत्येववक्तीत्येवकारंनपश्यामोमूलइत्यतआह ॥ एकोहिशब्दःएवार्थइति । निपातानामनेकार्थत्वादितिभावः ॥ प्रकरणवशादिति । वक्ष्यमाणदिशाविज्ञानएवैतेभ्यइत्यादिप्रकरणस्यमुक्तिपरत्वादितिभावः ॥ अतएवेति । अस्मदादेरपरोक्षज्ञानाभावादेव ज्ञांननास्तीत्यनुक्त्वासंज्ञानास्तीतिसंशब्दप्रयोगइत्यर्थः ॥ अनुच्छित्तिधर्मेतीति । नित्यइत्यर्थः । इतिशक्यतेवक्तुमितिपूर्वेणान्वयः । तथाचधर्माणामनुच्छित्तिर्नलभ्यतइतिभावः ॥ कथमेतदिति । उत्तरवाक्यमित्यर्थः । श्रुत्यर्थमाह ॥ विज्ञानेमूर्त्तिरिति । मूलपदानिव्याचष्टे ॥ अस्येत्यादिना । आशंक्यज्ञानहानिमित्यस्यव्यक्तमर्थमाह ॥ अनेनेति । संज्ञानास्तीतिवाक्येनेत्यर्थः । अत्रैवज्ञानाविषयेमामोहांतंमोहाख्यनाशमापिपत्प्राप्तत्वानितिश्रुतिवाक्यार्थंमनसिनिधायमूलपदानियोजयति ॥ भवान्मांप्रतीत्यादिना ॥ इत्यनेनेति । वाक्येनेत्यनुषंगः । नाहमित्यादिमूलार्थमाह ॥ ज्ञानेति । मोहंमांप्रापयामासेतिबृहद्भाष्यनुरोधादाह ॥ यद्वेति । णिजंताल्ल्यबिति । शकिशंकायामितिधातोःहेतुमतिचेतिणिच्प्रत्ययेसमानकर्तृकयोरितिक्त्वाप्रत्ययेसमासेनञ्पूर्वेतिल्यपिणेरनिटीतिणिलोपेइदितोनुम्धातोरितिनुमागमेसत्याशंक्येतिरूपसिद्धेरितिभावः । अस्येत्यस्यलिंगव्यत्ययमुपेत्योक्तमस्याइति । आशंक्यशंकांजनयित्वा ॥ श्रुतांविति । नप्रेयसंज्ञास्तीतिश्रुतावित्यर्थः । परीक्ष्येति । प्रमेयनिर्णयार्थमित्यनुषंगः ॥ अतएवेति । परीक्षापूर्वंनिरूपयितुंप्रवृत्तत्वादेवेत्यर्थः ॥ यदर्थमिति । अनुच्छित्तिधर्मेतिवाक्यार्थनिर्णयार्थंआदितोविज्ञानघनएवैतेभ्यइत्यादिवाक्यमाशंक्येत्यादिनाव्याख्यातमित्यर्थः ॥ तात्पर्ये

र्यांतरमिति । नामुक्तज्ञेयतेत्युक्तेर्थेज्ञापनरूपंतात्पर्यंधर्मानुच्छित्तिमेवास्येत्यनेनोक्तं । तदपेक्षयातात्पर्यांतरमित्यर्थः । (तार्किकैर्विनिवारितानितिकिमर्थमुक्तंअनुच्छित्तिधर्मेत्युक्त्यैवमैत्रेय्याउत्तरितत्वादित्यतआह ॥ तार्किकैरितीति) ॥ [६४१।२३] स्वमतरीत्येति । सिद्धएवेत्यन्वयः ॥ ननुसंख्यादिधर्माणांअनुच्छित्तिवक्तीत्यपिशक्यंवक्तुमित्यादिनाकृतचोद्यस्यकिमनेनोत्तरमुक्तमित्यतआह ॥ [६४१।२५] इदमत्राकूतमिति । अभिप्रायइत्यर्थः ॥ [६४१।२६] पूर्ववाक्येनैवेति । अविनाशीत्यनेनैवेत्यर्थः ॥ [६४२।१] उक्तरीत्येति । ज्ञानरूपस्येत्यादिनोक्तरीत्येत्यर्थः ॥ [६४२।२] उक्तेति । नमुक्तज्ञेयतेत्युक्तार्थमित्यर्थः ॥ [६४३।३] रूपादयइति । रूपरसगंधस्पर्शशब्दाः । प्रधानचक्षुर्विषयत्वाद्रूपस्यादितोग्रहणं । आचिक्षेपेत्यत्रकर्त्राकांक्षायामाह ॥ [६४३।६] श्रुतिरितिवक्ष्यतीति । उत्तरार्धे ॥ [६४३।८] तदभावेति । विषयभोगाभावनिंदेत्यर्थः ॥ हिशब्देनेति । यत्रहीतिहिशब्देनेत्यर्थः । यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिश्रुत्यर्थमाह ॥ [६४२।९] यत्रेयदीत्यादिना ॥ [६४३।१३] तुशब्दोविशेषार्थइति । भोगाभावेऽनिष्टत्वप्रसंगोयंनत्वद्वैतमताक्षेपपरमितितर्कंविशेषयितुंअयंतुशब्दइत्यर्थः । अद्वैतमेवानयाश्रुत्याक्षिप्तंनविषयभोगाभावमतमितिशंकितस्यकिमुत्तरंजातमित्यतआह ॥ सत्यमेतदित्यादिना ॥ [६४३।१४] अनयेति । यत्रहिद्वैतमिवेतिश्रुत्येत्यर्थः ॥ तच्चेति । निराकरणंविषयभोगाभावापादनेनकर्तव्यमित्यर्थः । शंकते ॥ [६४२।१६] भवेदेवमिति ॥ अर्थापत्त्येति । विषयभोगाभावस्यापादनान्यथानुपपत्तिरूपार्थापत्त्येत्यर्थः ॥ [६४३।१९] इत्यद्वैतिनइति । आहुरितियोज्यं ॥ [६४३।२१] उत्तरत्रेति । उत्तरश्लोके । इत्यनिष्टंहिसर्वथेत्यत्राकांक्षांपूरयति ॥ इतिवाक्यद्वयोक्तमित्यादि । (भवेदेवमितिकृ)प्रकृतचोद्यस्ययेनेदमितिमू

लेनोत्तरस्यास्पष्टत्वादाह ॥ [६४२।२२]एतदुक्तमिति । कुतोक्तविषयप्रदर्शनमित्यतआह ॥ [६४२।२६]प्रागव्याख्यातत्वादिति । तावद
र्थेतावच्छब्दार्थइत्यर्थः ॥ [६४३।२]इत्यादेरिति । सर्वेवेदायत्पदमामनंति । सर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणइत्यादिश्रुतेरितिभा
वः ॥ अन्यथाव्याख्येयमिति । अद्भुतत्वादनिर्वाच्यमतर्क्याज्ञेयमेवचेतिभाष्योक्तदिशेतिभावः ॥ [६४३।४]प्रसंगादिति ।
आत्मविज्ञानएवविरोधस्यपरेणप्रसंजितत्वेनतस्यैवप्रकृतत्वादितिभावः ॥ [६४३।६]अनुपलंभेति । यद्यत्रानुपपत्तिःस्यात्तर्ह्युपल
भ्येतनोपलभ्यतइत्यनुपलंभसनाथेनेत्यर्थः ॥ [६४३।७]अहमितीति । अहमित्येवयोवेद्यःसजीवइतिकीर्तितः । सदुःखीससुखीचै
वसपात्रंबंधमोक्षयोरित्याद्याइत्यर्थः । अपिपदेनश्रुत्यादिग्रहणमित्युक्तं । तत्रादिपदार्थस्तर्कोपीतिभावेनाह ॥ [६४३।८]यदिचे
ति ॥ ममेदमिष्टेति । स्वात्मज्ञानाभावेममेत्यस्मदर्थोपरक्ततयेष्टानिष्टज्ञानाभावादित्यर्थः ॥ तथाविधेति । फलमिदमिच्छा
मिममेदमिष्टंअहमत्रप्रयतेममायंकृतिविषयइतीच्छाप्रयत्नयोरित्यर्थः । स्वप्रकाशत्वाज्जीवस्यसर्वमुपपत्स्यतइत्यतआह ॥ स्वप्र
[६४३।९]काशत्वमिति । ननुछिदिक्रियादौकर्त्रादेर्भेददृष्टेरेकत्वाभ्युपगमोविरुद्धइत्यस्यनसमाधिःप्राप्तइत्यतआह ॥ [६४३।११]अयमाशयइ
ति ॥ [६४३।१२]अस्येति । एकस्यांक्रियायामित्युक्तन्यायस्येत्यर्थः ॥ [६४३।१५]नात्मानमिति । आत्मानंपरमात्मानंजीवंचपरान्जीवस्व
रूपतमःकालसुखेभ्योन्यान्संवेत्तिसंवेदयतीत्यंतर्णीतणिच्सर्वदृक्सर्वंदर्शयतीतिसर्वदृक्। इतिश्रुताविति । मांडूकश्रुतौ ॥
अनिष्टप्रकरणादिति । [६४३।१६]येनेदमखिलंवेदतंचकेनविजानीयात्विज्ञातारंचकेनविजानीयादितिवाक्यद्वयोक्तापादनस्यानि
ष्टत्वसमर्थनेनतत्साहचर्यरूपप्रकरणादित्यर्थः ॥ [६४३।१८]अतएवेति । (भोगस्यश्रु)विषयसंसर्गसद्भावस्यश्रुत्यंतरसिद्धत्वादेव ।

मात्रासंसर्गस्त्वस्य भवतीतिमाध्यंदिनश्रुतिवाक्येपूर्वोक्तेमात्राभिःरूपादिविषयैःसंसर्गोभोगलक्षणःइतिसिद्धांतीयव्याख्यानंवि नामात्राभिरसंसर्गोभोगाभावइतिपरकीयव्याख्यानं येनेदमखिलंवेदेत्येतदवतारिकायामुक्तमसत् श्रुतिविरोधप्राप्तेरितिभा वः। क्वचिदित्यस्यार्थोऽभिधानादाविति। तत्राकांक्षांपूरयति॥ अभाववाचितानुक्तेरिति॥ स्वरूपमात्रमिति। युक्ति र्नोक्तेत्यर्थः। यद्वाऽस्वातंत्र्यमेवार्थइत्युपेत्यनोक्तमित्यर्थः। नतुव्याप्त्युपयोगितयोक्तमितिवार्थः। व्यभिचाराभावात्। भेदाभेदमात्रपरत्वभ्रमनिरासायविरोधिद्वयमात्रग्रहणायाह॥ प्रतियोगिद्वयोपलक्षणमिति। ननुभेदाभेदादिरूपप्र तियोगिवाचित्वेद्वैतमिवेत्यत्रेवशब्देनैवभेदाभेदयोर्लाभात्पुनर्द्वैतमितिव्यर्थमित्यतआह॥ इवांतइति। अस्माकमिति। द्वैताभाववादिनामित्यर्थः॥ अन्यथाव्याकुर्वतइति। आशंक्यास्येत्येतदवतारिकायामुक्तदिशेतिभावः। यद्वायेनेदम खिलंवेदेत्येतदवतारिकायामुक्तदिशेतिभावः॥ कल्प्यइति। त्वयेतियोज्यं। सिद्धांतदिशाहअपुरुषार्थत्वेति। तत्रैवसंमति माह॥ (यथोक्त)तदुक्तमिति। बृहद्भाष्ये। सांख्याद्यभिमतमोक्षस्याप्रामाणिकत्वोक्तिः॥ ७॥ यदुक्तमिति। हेयत्वाद प्रियस्येत्यत्रेतिभावः। मुक्तिजन्यप्रयोजनमितिधीनिरासायाह॥ संबंधमात्रेषष्ठीति। नकेवलंप्रागुक्तदिशाऽप्रामाणिको पित्वपुमर्थश्चेतिसमुच्चयेचशब्दइत्याह॥ चशब्दइति। संबंधमात्रइत्युक्तस्यविवरणं॥ मुक्त्यर्थइति॥ यदत्रेति। दुःख स्योपादानविषयेमुक्तिर्नेत्युक्तमित्यर्थः। तद्वाक्यंपठति॥ यस्येति। नीतिवाक्यंपठति॥ असत्यानीति। दुरंतानिउत्तरवधि शून्यानि॥ दुःखहानेनेति। राज्यव्यापारविक्षेपनिमित्तदुःखहानेनभोगनिमित्तसुखहानेत्यर्थः। मुक्तेरितिपंचमी। शंकते॥

यत्रेति । एवमेतत् निवृत्तिरित्येतदेवमेवेत्यर्थः।निरंतरात्निबिडात्कांताराद्दुर्गममार्गात्कांतारंवर्त्मदुर्गममित्यभिधानात् ॥
निरस्ततस्करतयेति । दस्युनिबिडेकांतारेगंतुंबिभ्यतस्तस्करनिरासेनसुगमोमार्गोलोकेदयालुनोपदिश्यतेतथेत्यर्थः ॥ जांघि
कादिर्नजनइति । जंघाभ्यांजीवतियोजनःसजांघिकः । जंघापदात्जीवतीत्यर्थेचतुर्थाध्यायांत्यपादस्थेनवेतनादिभ्योजीव
वतीतिसूत्रेणठकिसतितस्येकादेशादिवृद्धियस्येतिलोपेषुरूपसिद्धेःवैतनिकइत्यादिवत् । अन्यवार्तांराजानंप्रतिवाराजवार्तामि
न्यंप्रतिवाराजपत्रादिकंवेतस्ततोनेतुंनित्यंबहुयोजनंसंचरन्पुरुषइत्यर्थः । आदिपदेनसमुद्रेप्लवेनवाणिज्यंकुर्वन्वणिक्तस्करःसे
वकश्चेत्येवमादिर्ग्राह्यः ॥ यांचेति । धर्मार्थकामास्सर्वेपिननित्यामोक्षएवतु । नित्यस्तस्मात्तदर्थाययतेतमतिमान्नरइति ।
अनित्यत्वात्सदुःखत्वान्नधर्माद्याःपरंसुखं । मोक्षएवपरानंदःसंसारेपरिवर्ततामित्यादौचानिंदेत्यर्थः। नाशस्यध्वंसरूपस्यनित्यत
यानिवृत्त्ययोगादाह ॥ प्रसक्तस्येति ॥ स्पष्टान्येवेति। जांघिकास्तस्करसेवककृषीवलादीनीतिभावः॥परेणापीति ।दुःख
हानिःपुमर्थइतिवदतापितात्कालिकक्षुन्निमित्तदुःखहानेस्तत्रापिसत्वात्कथंत्यागइत्युक्तेःदुःखहानिरल्पा दुःखावाप्तिरधिकेत्येवो
क्त्वायत्रमहादुःखहानिःतत्रैवप्रवृत्तिर्नान्यत्रेतिव्यवस्थायाःकर्तव्यत्वादित्यर्थः । यद्वाजांघिकादावल्पसुखेपुमर्थत्वं मधुविषसंपृ
क्तान्नेसत्यप्यल्पसुखेपुमर्थत्वाभावइत्यत्रमहादुःखानवाप्त्यवाप्तिभ्यांव्यवस्थायाःकार्यत्वादित्यर्थः । उत्तरवाक्यमवतारयितुं
शंकामाह ॥ स्यादेतदिति । विषविषंगाद्विशेषेणविशिष्यसंसर्गादित्यर्थः ॥ मीङ्मेरदिति । मुङ्प्राणत्यागइत्य
तोलुङिप्रत्ययेतस्याणिश्रिद्रुस्रुभ्यःकर्तरिचङितिचङिञ्चङिञ्चेतिद्विर्वचनेसन्वल्लघुनिचङ्परेनग्लोपइतिसन्वद्भावेसन्यतइत्य

भ्यासस्येत्वेदीर्घोलघोरित्यभ्यासस्यदीर्घेनमाङ्योगइत्यडभावेइतश्चेतितिपइकारलोपेमीमरदितिरूपंमावामारयतुइत्यर्थः ।
उपयुंक्ष्महेउपयुक्तंकरिष्यामइत्यर्थः ॥ आपत्तिमिति । तादृशान्नाद्युपभोगेनजनिष्यमाणविपदमालोचयंतइत्यर्थः ॥
इहापिसंबध्यतइति । यस्माद्वीतरागाअप्येवमल्पसुखायमहद्दुःखंसहंतेतस्माद्रागनिमित्तंतदितिनचेत्यर्थः । कर्माकांक्षां
पूरयति ॥ युद्धदर्शनमिति । इहश्लोकेयदेत्यस्यानन्वयादाह । पूर्वत्रोत्तरत्रवंति । स्कंदपुराणवाक्यएवपूर्वत्रउत्तरत्रेवेत्य
र्थः । तस्मादितिश्रवणादाह ॥ यस्मादितीति । इतिस्कंदवचोयस्मात्तस्मादित्यर्थः । अविवेकइतिपदच्छेदः ॥ कथमि
ति । मुक्तिरित्यनुषंगः ॥ अस्थानइति । अयुक्तस्थलइत्यर्थः ॥ नारदादयोनिदर्शनमिति । विवेकिनोपितेसुखार्थंयतं
तइतिनिदर्शनमित्यर्थः ॥ पराभ्युपगतइति । तेनयदितादृशोमुक्तःसिद्धःदुःखयुगित्ययुक्तं । यद्यसिद्धःतर्ह्याश्रयासिद्धिरि
तिदोषोनिरस्तः । पराभ्युपगममात्रेणापादनेपक्षतोपपत्तेरितिसूचितं । ननुचैतन्यवान्चेतनःनचमुक्तस्यज्ञानरूपंचैतन्यंतार्किकै
रुपेयतेअतोविशेषणाभावाद्विशिष्टापादकासिद्धिरित्यतआह ॥ आत्मत्वोपलक्षणमिति ॥ सुखसाधनादिति । सु
खस्यसमर्थनादित्यर्थः ॥ प्रतिज्ञयेति । दुःखयुगेवनतुतदभाववानित्युक्त्यापराभिमतदुःखाभाववान्नभवतीत्यर्थलाभइ
तिभावः। ननुमुक्तोदुःखयुगितिसाधनेबाधोपसिद्धांतश्चेत्यतआह ॥ नचेयमिति । आपाद्यद्वयंअनात्मावादुःखीवास्यादिति ॥
संमतवदिति । घटवदितिसंसार्यादिवदितियथाक्रमंदृष्टांतौज्ञेयौ । नारकिणोप्यस्तिकिंचित्सुखं नारक्यांनिर्वृत्तौसत्यामभि
यादेः। अतोत्रविवक्षितस्यसर्वात्मनासुखाभावरूपापादकस्यनारकिण्यभावात्नव्यभिचारइतिभावः। आत्मत्वेसतीत्यापाद्येऽभि

परिमळ० मतत्वान्नघटादौदुःखिवदित्यस्याभावाद्व्यभिचारइतिचोद्यानवकाशः । यदिमोक्षःसुखानुभवहीनःतर्ह्ययुमर्थःस्यान्मोहवदित्या अ.४पा.२
॥२३॥ दिरादिपदार्थः ॥ समुच्चयइति । प्रागुक्तसाधकबाधकाभ्यांसहसमुच्चयइत्यर्थः ॥ सुखविशेषाणामिति । आनंदःस्व
रूपसुखंविषयोत्थंसुखंमुदित्युच्यते । प्रकृष्टविषयोत्थंप्रमुदितिभावः । कृधीत्यस्यसाधुत्वार्थंहेर्धिरादेशविकरणलोपविधानपरं
षष्ठांत्यपादस्थंसूत्रंपठति ॥ श्रुशृण्विति । किंवदंतीत्यपेक्षायामाह ॥ मुक्तस्यसुखमिति । नन्वेवमशरीरंवावसंतमि
तिदेहेंद्रियासुहीनानांवैकुंठपुरवासिनामित्यादेःकागतिरित्यतआह ॥ अशरीरत्वादेर्गतिश्चेति । प्राकृतप्रियहानिस्त्वित्या
दिनाप्राकृतसुखाभावोक्त्याअशरीरत्वस्यापिप्राकृतशरीराभावपरत्वमुक्तप्रायमितिगतिश्चोक्तेत्युक्तं ॥ प्रकृतिविपरिणा
मविशेषस्येति । सत्वात्संजायतेज्ञानमित्यादौ ॥ साधुत्वेति । सद्भावेसाधुभावेचसच्छब्दःपार्थउच्यतइत्यादौ । संवल
नभ्रांतिंनिराह ॥ सहचरितमिति ॥ श्रुत्यभावइति । मिश्रपदरूपश्रुत्यभावइत्यर्थः । भावाइत्यस्यविवरणंविकाराइति ।
जरावलीपलितादयः ॥ प्रकृतिरिति । बंधकतयानेत्यर्थः ॥ साधवइति । प्रल्हादादयइत्यर्थः । सुरुचःसुवर्चसइत्यनयो
रपौनरुक्त्यायार्थभेदमाह ॥ रुक्प्रभेतिवर्चोबलमिति । यइत्यत्रलोकइतिविशेष्योक्तिः । प्रकरणवशादाह ॥ एवंवि
धानामिति । प्रवालेत्यादिविशेषणोक्तार्थपरामर्शः । एकत्रबाधादाह ॥ केचिदिति । बहुव्रीहिगर्भःसमासइत्याह ॥ इ
तिविग्रहइति ॥ इनिरुत्पाद्यइति । व्रीह्यादिभ्यश्चेतिइनिरित्यर्थः । तत्रतदंतविधिरिष्यतइत्युक्तंवादिनोःशून्यमायिनो ॥४८६॥
रित्येतद्व्याख्यावसरे । दृष्टांतदार्ष्टांतिकभावंव्यनक्ति ॥ प्रमदोत्तमाविश्रुतइति ॥ पूर्वेणान्वयइति । द्वितीयस्कंधेनवमेऽ

ध्याये तस्मैस्वलोकंभगवान्सभाजितःसंदर्शयामासपरंनयत्पदंइतिश्लोकेनान्वयइत्यर्थः । ऋचांत्वइतिश्रुतेःपृथगधिकरणेव्या
ख्यानादिहत्यागः ॥ [६४६।२०]श्रुतांविति । ऋचांत्वइतिश्रुतावित्यर्थः ॥ ऋगुच्चारणादिनेति । सामगानादिरादिपदार्थः । पुरुषपदस्य
देहविशिष्टपरत्वेपरस्यासिद्धिःसाध्याविशेषोवास्त्रीषुभागासिद्धिर्वेत्यतआह ॥ [६४६।२१]आत्मत्वादित्यर्थइति ॥ [६४६।२३]आपर्यंतीति । प्रा
पर्यंतीत्यर्थः । सांख्याद्यभिमतमोक्षस्यापुमर्थत्वोक्तिः ॥५॥ [६४६।२५]श्रुतीनामिति । मुक्तावैक्यबोधकश्रुतीनांवियत्पादेपृथगधिकरणे
तथाभक्तिपादेअतएवचोपमेत्यत्रच स्थानैक्यमत्यैक्यपरत्वेनस्थानैक्यमैकमत्यंचमुक्तस्यतुविशेषतइत्यादिनाव्याख्यानादित्यर्थः
प्रमेयेत्यनुवादः । मुक्तावपीत्यादिव्याख्या ॥ [६४७।१]उपेत्यतथेति । नेदंश्रुतिप्रतीतिकग्रहग्रहणंकिंत्वर्थोक्तिपरमितिभावः ॥ [६४७।४]अन्यार्थइ
ति । अन्यार्थोभगवदर्थःसउत्तमःपुरुषइतिपरामर्शइतिदहराधिकरणस्थसूत्रार्थः ॥ [६४७।५]अमृतत्वस्येति । मुक्तवर्गस्येत्यर्थः । अन्नेना
न्नमर्त्त्यसंसारिणंअतिरोहति । अतिक्रम्यवर्तते । मर्त्त्यमन्नंयदत्यगात्इतिप्राग्व्याख्यानात् । परंज्योतिरुपसंपद्येत्यादिश्रुत्युक्ता
नुरोधादाह ॥ तत्समीपं[६४७।६]प्राप्तइति । प्रस्तुताद्वैतिनंप्रतिमुक्तौभेदस्यैववाच्यत्वात्भोगोक्तिरसंगता । भोगस्यचतुर्थपादएववक्त
व्यत्वादित्यतआह ॥ [६४७।७]अद्वैतिनइति । जीवस्यपरेणेत्येतदैक्यपदेनान्वेतीत्याह ॥ जीवस्येत्यादिना । नित्यसापेक्षत्वादैक्यप
दस्यसमासइतिभावः । अपिपदान्वयोक्तिरनु[६४७।८]र्माअपीति । प्रमाणशब्दस्यकरणेल्युडंतस्यविशेष्यनिघ्नतयाप्रमाणाइति
भाव्यमित्यतःउद्देश्यविधेयव्यत्यासेनयोजनामाह ॥ मुक्तावपीत्यादिना ॥ ॥ विवृतमेतद्युक्तिपादेस्मृतिनये । पिपीलिका

लिपिश्चापिप्रमाणमित्यत्र ॥ ऐक्यादि[६४७।९]शब्दइति । परत्वशब्दआदिपदार्थः । मुक्तिसंबंधीकालःजीवपरात्यंताभेदयुतोन
कालत्वादिदानींतनकालवदित्याद्यनुमाजीवस्यपरत्वरोधेपरेणात्यंताभेदनिवारणेइत्येवंव्याख्येयमित्यर्थः ॥ [६४७।१०]दृष्टांतदोष
इति । अभेदयुतोनेत्येवोक्तेसंसारकालेभेदाभेदयुक्तत्वांगीकारादभेदोनेतिसाध्यस्यासत्वात्साध्यवैकल्यमितिदोषोनेत्यर्थः ।
अत्यंताभेदाभावस्यतदानीमपिसत्त्वादितिभावः ॥ निष्कृ[६४७।११]ष्टव्यक्तीति । अहंकाराद्युपाधिपरिच्छिन्नोहंधीविषयइत्यर्थः ॥
अन्यथेति । विशेष्यभूतचेतनपरत्वेतस्यपरेणैक्यंसंसारकालेप्यस्तीतिसाध्यवैकल्यदोषःस्यादित्यर्थः । नचैवं मुक्तौतादृशस्यै
क्यानंगीकारात्सिद्धसाधनेतिशंक्यं । तस्यैवउपाधिहीनस्यमुक्तौजीवशब्देनग्रहणादितिभावः । असावित्यस्यआवृत्तिपरमात्मपर
त्वंजीवपरत्वंचोपेत्ययोजयति ॥ [६४७।१२]जीवइति । फलितमाह ॥ अनुपपन्नमित्यर्थइति ॥ [६४७।१३]मतभेदेनेति । योजीवःपूर्वंपरेणाअत्यं
तंभिन्नःअसौजीवःपश्चात्सपरमात्माभवेदितिकथंयुक्तिमेतीत्यवधारणेनविनाद्यमतेव्याख्यानं । द्वितीयमतेतुयःपूर्वमसावेवन
परमात्मैवन परमात्मनात्यंतभिन्नोन किंतुभिन्नाभिन्नः । असौजीवःपश्चान्मुक्तौसएवपरमात्मैवतेनपरमात्मनात्यंताभिन्नइतिक
थंयुक्तिमेतीतिव्याख्यानंकार्यमित्यर्थः ॥ अतएवेति । भेदाभेदमतस्याप्यत्रनिराकार्यत्वादेवेत्यर्थः ॥ प्रागेवेति । युक्ति
पादेभोक्त्रापत्त्यधिकरणे नान्यदन्यत्वमापन्नंक्वचिद्दृष्टंकथंचन । अतोजीवस्यनब्रह्मभावःस्याद्धिकदाचनेत्येनद्व्याख्यावसरे ॥४८७॥
जीवोनकालांतरेणब्रह्मणैक्यमापत्स्यतेततोभिन्नत्वादितिदर्शितइत्यर्थः । यदित्यस्यावृत्तिमुपेत्ययोजयति ॥ [६४७।१४]यत्किंचिदि

त्यादिना । तात्पर्यमाह ॥ येनसतेति । नासतेत्यर्थः । एवमर्थोक्तेःकृत्यमग्रेएतेनेत्यनेनस्वयमेववक्ष्यति । यदितिश्रवणात्त
दितिस्वयमेवाह ॥ [६४७।१५]तत्पश्चादिति ॥ [६४७।१६]एतेनेति । येनसतेत्यर्थकथनेनेत्यर्थः । क्षीरत्वसमयेदध्नोऽसत्वान्नेदंव्यभिचारस्थल
मितिभावः ॥ ७ ॥ भास्करादिमतनिरासः ॥ ७ ॥ मुक्तावपिभेदाभेदवादीशंकते ॥ [६४७।१८]कुतइत्यादिना । कुतोस्मन्मतमयुक्तं ।
भवदुक्तवचनानांअनुमानयोश्चभेदाभेदवादिनोममाविरोधादित्युपपादयति ॥ उदाहृतेति । नवर्ततेयत्रेत्यादिवचनानांभे
दज्ञापकत्वात् । भेदस्यचमन्मतेमुक्तावपिसत्वादितिभावः ॥ [६४७।१९]आद्यस्येति । कालोप्यसौनैक्ययुतःपरेणजीवस्येत्यत्रोक्तस्येत्य
र्थः ॥ असिद्धव्याप्तिकत्वादिति । संसारकालेप्यभेदस्यसत्त्वादितिभावः ॥ द्वितीयस्यचेति । कथंचयःपूर्वमसौनप
श्चादित्यत्राभिमतस्यभोक्त्रापत्तिनयोक्तस्येत्यर्थः ॥ [६४७।२०]सिद्धसाधनत्वादिति । पूर्वंभिन्नाभिन्नस्यपश्चादपितथैवोपगमनेनात
द्भूतस्यतद्भावानभ्युपगमादितिभावः । भगवदवतारादिसर्वज्ञकृतानांबौद्धशैवादिमतानांभ्रमजत्वाभावादाह ॥ [६४७।२३]कानि
चिदिति । सुविदितइतिसप्तम्यंतं । प्रमेयेइत्यनुषंगः ॥ [६४८।२]वयमेवनभूयास्मेति । ममसत्वंमाभूदितिस्वात्माभावमेवोद्दे
श्यंनजानतइत्यर्थः । इत्यादीत्यादिपदेनममक्लेशनिवृत्तिरेवास्तुसुखंमाभूदितिनजानतइतिग्राह्यं ॥ तदनेनप्रबंधेनेति । तत्र
मोक्षस्वरूपंत्वित्यतोधस्तनग्रंथेनपादप्रतिपाद्यंपादानांसंगतिंचोक्त्वातत्स्थैर्यायतत्रमोक्षेत्यादिनापरमतानांहेयत्वोपपादनेनसम
र्थितमित्यर्थः ॥ ७ ॥ (पादप्रतिपाद्यसंगतिसमर्थनं ॥ ७ ॥) पूर्व[६४८।३]पादद्वयेति । ज्ञानपादकर्मक्षयपादयुक्तीत्यर्थः । पुरुषार्थो
तःऔदार्यंपूर्वपक्षयुक्तिःव्यवस्थितिःसिद्धांतयुक्तिः । एवमग्रेपि ॥ असार्वत्रकी औदार्यं व्यवस्थितिः ॥ नाविशेषात् उच्चाव

चशक्तिः अविशेषः ॥ स्तुतयेनुमतिर्वा आत्मस्वरूपदार्ढ्यं स्थितिः ॥ सर्वथापितुतएवोभयलिंगात् आत्मस्वरूपदार्ढ्यं स्थितिः ॥ नचाधिकारिकमपि निजस्वभावः निषेधसामान्यविधिक्रियाणांविभक्तता ॥ स्वामिनःफलश्रुतेः स्वातंत्र्यं अत्वरयैवसिद्धिः ॥ कृत्स्नभावात्तु आपूर्णयोग्यता अत्वरयैवसिद्धिः अनाविष्कुर्वन् अपूर्णाविशेषयोग्यता अत्वरयैव सिद्धिः ॥ ऐहिकमप्रस्तुतप्रतिबंधे एवंमुक्तिफलानियमः विरोधहानिः अत्वरयैवसिद्धिः ॥ ३ ॥ ४ ॥ आवृत्तिरसकृदुपदेशात् सुशक्यता महाफलत्वं ॥ आत्मेतु शश्वदतिप्रसिद्धिः प्रविविक्तता ॥ नप्रतीके विवेकः संधिग्रहः ॥ ब्रह्मदृष्टिः विन्यासः साधनं ॥ आदित्यादिमतयश्च विचारः आप्तकृत्यं ॥ आसीनः संज्ञा विशेषकार्यं ॥ आप्रायणात् नानाप्रवृत्तिः विशेषकार्यं ॥ तदधिगमे कृतकृत्यता संस्थितिः ॥४॥ १ ॥ वाङ्मनसिदर्शनात् व्यामिश्रता विशेषसाम्यश्रुतिः ॥ तन्मनःप्राणे कार्यकरत्वं आढ्यताच ॥ सोध्यक्षे कार्यकरत्वं आढ्यता ॥ भूतेषुतच्छ्रुतेः अर्थक्लृप्तिः समानलोपः नैकस्मिन्दर्शयतोहि अर्थक्लृप्तिः समानलोपः ॥ समानाच । सुदार्ढ्यं (सर्वसाम्यभावः)महिमा ॥ तदपीतेः सुदार्ढ्यं महिमा ॥ तानिपरेतथाह्याह परतंत्रता विशेषः ॥ अविभागोवचनात् समानधर्मः कृतार्थता ॥ तदोकोग्रज्वलनं कृतशेषता शश्वदनुप्रवृत्तिः ॥ योगिनःप्रतिस्मर्यते लोकोपमा शश्वदनुप्रवृत्तिः ॥ ७ ॥४॥ २ ॥ करणसाधनइति।विपक्षाः पूर्वपक्षाःसंप्राप्यंतेयाभिर्युक्तिभिःताविपक्षसंप्राप्तयः तासांविरुद्धहेतवइत्यर्थइतिभावः। पूर्वमतानुसाराइत्यत्रदोषमाह ॥ युक्तयोस्मिन्पादइति । करणसाधनतामुपेत्याह ॥ अनुस्त्रियंतेएताभिरितीति । पूर्वमतानीतियोज्यं । पूर्वपक्षप्रापिकाइ

क

त्यर्थः ॥ ७ ॥ नैकस्मिन्दर्शयतोहि । इहेत्यनुवादः । श्रुताविति व्याख्या । पृथिव्यांऋभवइतिश्रुतावित्यर्थः ॥ शंकाबी
जेति । भूतवायुरेवेतिशंकायांयद्वीजंभूतप्ररणरूपंतदनुवादइत्यर्थः । भूतेष्वित्यस्यश्रुतावभावात्तथोक्तिंघटयति ॥ भूतेष्वि
ति । प्रोक्तमित्यनुवादः । सूत्रकृतागृहीतमितिव्याख्या । इत्यर्थइत्युत्तरवाक्यमत्रपूर्वत्रचाकृष्यते । युक्त्येत्यनुवादः ॥ इ
तिश्रुताविति । बह्वृचब्राह्मणे ॥ राष्ट्राधिपतीराजेति । ढ्रलोपेपूर्वस्यदीर्घोणइतिदीर्घः ॥ ७ ॥ ४ । २ । ९ ॥ ७ ॥ ता
निपरेतथाह्याहेतिसूत्रं ॥ तथाह्याहश्रुतिरितीति । सर्वेदेवाःप्राणमाविश्यदेवेमुक्तालयंपरमेयांतीतिश्रुतिरित्यर्थः ॥
श्रुत्याद्युक्तंसर्वंक्रममिति । वक्ष्यमाणमित्यर्थः । प्रोद्गातॄणांचमसभक्षइत्यत्रेवबहुवचनमाद्यर्थइत्याह ॥ भूतादीनीति ॥
तृतीयार्थेइति । चैत्ररथेनलिंगादित्यत्रेवतृतीयापंचम्योर्हेतुरूपैकार्थ्यादितिभावः । ल्यपःसमानकर्तृकक्रियांतरापेक्षामाह ॥
व्याख्यातव्यइति । तुशब्दान्वयेनानूद्यार्थमाह ॥ नत्वन्यदिति । तत्किंव्याख्यानमित्यतआह ॥ साक्षात्तत्रलयइ
ति ॥ तथाचवक्ष्यतीति । उमागिरीशावपिभारतीराविविशेत्यत्र तथाइंद्रप्रवेशस्तुयदोच्यतइत्यत्रचेतिभावः । तयैवरुद्र
मित्यत्रतच्छब्दार्थमाह ॥ तयागिरिजयेति । पतिमित्यत्राकांक्षांपूरयति ॥ वाण्याइति । वाक्यभेदेनपदद्वयस्यसार्थक्य
मितिभावेनाह ॥ यद्वेति ॥ अस्यैवविवरणमिति । तस्मिन्लयंयांतीत्यादिश्लोकद्वयोक्तस्येत्यर्थः । अतएवप्राकृतमे
वक्रमंसंक्षेपेणाहेत्युक्तमिति ॥ यदुक्तमिति । अशेषक्रमानुरोधेनेत्यत्रोक्तमित्यर्थः । तस्यश्रुत्याद्युक्तसर्वक्रममनुसृत्येतिव्याख्या
नात् । इहेत्यनुवादः । इंद्रादिचतुष्टयइतिव्याख्या ॥ भूतेष्विति । प्रवेशइत्यन्वयः । ननुप्राक्उमादिशब्दानांअप्रयोगा

त्उमागिरीशौभारतीराविंतिवागितिकथमेकवचनंचा(वा)युक्तंवाचइतिवक्तव्यत्वादित्यतआह ॥ [६४९।११] वागिति ॥ [६४९।१२] एतत्प
र्यायेति। उमादिशब्दपर्यायाणांश्रुत्यंतराद्युक्तपर्यायाणांचगिरिजांरुद्रंगिरंवायुंइत्याद्युक्तगिरिजोमादिशब्दानांसमुदायोगृह्यत
इत्यर्थः । वेदगतावाकुतथावदतुनामभवंतःकिमर्थमेवंवदंतीत्यतआह॥ [६४९।१८] वेदवाक्येति । वयंमूलकाराः । तथैवगिरिजोमादि
शब्देनैवेत्यर्थः । अस्फुटत्वादाह॥ [६४९।१९] एतदुक्तं भवतीति ॥ आश्रमांतरप्राप्त्यादिनेति। राजादिनाप्रीत्यादिनानामांतरेप्रा
प्तइत्यादिपदेनग्राह्यं ॥ एतेनेंद्रादिष्विंद्रादित्यबृहस्पतीनामिति । इंद्रादित्यबृहस्पतीनांक्रमाल्लयकथनेनइंद्रस्यसु
पर्णपत्न्यांआदित्यस्यतुगुरौगुरोश्चशक्रेइत्येवंलयोविवृतः। तथासूर्योग्नियुक्तइत्युक्त्यासूर्यद्वारातेजसोवायाविति विवृतंभवतीत्य
र्थः ॥ [६४९।२३] अधिकरणमात्रस्येति । नतुकालरूपाधिकरणविशेषस्येत्यर्थः। तथात्वेकोर्थस्संपन्नइत्यतआह ॥ [६४९।२४] यत्रश्रुताविति ॥ अत्रेति । इंद्रउमायांउमारुद्रइतिश्रुतावित्यर्थः । एवकारान्वयेनानुवादः सुपर्णपत्न्येवेति । गिरीशशब्दग्रहणमतंत्र
मितिभावेनाह ॥ गिरीशनाम्नागिरीशपर्यायेणेति। उमादिशब्देनसुपर्णपत्न्यादिग्रहणेकिंनिमित्तमित्यतआह॥[६४९।२५] अत्रपदे
ति । उमादिपदंसौपर्ण्यादिपदसदृशंनन्यूनाधिकभावापन्नमित्यर्थः। सुपर्णपत्नींविशंतीत्यत्रविशंतीतिपदस्यमाहेंद्रमित्यत्राप्य
न्वयइतिभावेनाह॥[६५०।१२] इत्युभयत्रसंबध्यतइति। भूतचतुष्टयस्यलयउक्तःवायुभूतस्यलयोवक्तव्यइत्यतआह॥[६५०।१३] वायुभूतस्येति॥
प्रधानेति । तस्यतुलयःप्रागुक्तइतिभावः ॥ लयएवेति । नतूत्क्रांतिरित्यर्थः । अतइत्यनुवादः । एभ्यइतिव्याख्या । ता
दात्म्यमितिभ्रमनिरासायाह ॥ [६५०।१२] सयुजामिति । यद्वाकथमिदंसायुज्यमित्यतोअवयवशक्त्येत्याह ॥ सयुजामिति । भा

वार्थेष्यञ्प्रत्ययेआदिवृद्धौरूपमितिभावः ॥ [६५०।१५] उत्तरवाक्येनेति । किंचेतिवागिरांप्रभुश्चावददितिवासंबध्यतइत्यर्थः ॥ त
[६५०।१७] थाचन्यायविवरणइति ॥ ॥ तत्समानानांचविशेषवचनाभावेस्वसमानलयस्थानएवलयोपपत्तेरित्यजनकेपिलयस्योक्तत्वा
दितिभावः । उदाहरणंतुवरुणादजातानामप्यश्विप्रमुखानांविशेषवचनाभावेनस्वसमानाबादेवतालयस्थानेवरुणेलयः । उक्तं
हि(मृत्य) ऋभवःपृथिव्यांवरुणआपइतिश्रुतौ पृथिव्यामृभवोविलीयंतेवरुणेऽश्विनाविति॥ साधारणप्रलयइति। महदादि
जडसाधारणप्रलयइत्यर्थः ॥ [६५०।१८] अर्थांतरेइति। प्रकृतमुक्त्यपेक्षयासाधारणरूपार्थांतरइत्यर्थ ॥ उपपादितवानिति । न्या
यनिबंधने निर्णयात्मकत्वात् नतत्रसंशयःकार्यइतिभावः ॥ [६५०।१९] किंनियामकमिति । तथात्वेमनुष्याणामपितथाभावःस्यादिति
भावः । ननुलयोयतोमुक्तिरियंसुराणामित्यनेनविमतःसुरलयःमुक्तिर्भवितुमर्हतिसुरलयत्वात् व्यतिरेकेणसाधारणलयवदित्य
भि(मतेप्रयोगेसा)प्रेतानुमानेसाध्याविशिष्टतासाधनस्येत्यतआह ॥ [६५०।२१] सामान्येति । सुरलयत्वरूपविशेषेणमुक्तित्वसामान्यंसा
ध्यते । अयंवृक्षःशिंशुपात्वात्इतिवदित्यतोनदोषइति । सुराणांलयःसर्गक्रमाद्विपर्ययेणभवितुमर्हतिलयत्वात्साधारणलयवदि
तिपूर्वश्लोकाभिमतेप्रयोगेतुसाध्याविशेषशंकैवनास्तिहेतुसाध्ययोरत्यंतभेदात् । केचित्तुविमतोलयःसृष्टितोविपरीतक्रमवान्ल
येविपरीतक्रमसत्वादितिपूर्वत्रप्रयोगोभिमतः तथाचलयेविपरीतक्रमसत्वाल्लयोविपरीतक्रमवानित्युक्तंस्यात् एवंचसाध्याविशे
षः लयसामान्यगतेनविपरीतक्रमेणलयविशेषस्तुसुरलयरूपमुक्तौसाध्यतइतिनदोषइत्यर्थइत्याहुः । ननुसृष्टिक्रमो(यदि)भवदु
क्तलयक्रमात्क्वचिदन्यथाप्यस्तुनहिजनकजन्ययोरानुपूर्वीनियमेनियामकमस्तीत्यतआह ॥ सर्गश्चेति । तस्मादशेषाइत्या

दिनायेनक्रमेणलयउक्तः तद्विपरीतक्रमोनियमेनश्रुत्यादिसिद्धोनक्वचिदन्यथास्तीत्यर्थः ॥ प्राङ्मुक्तानामिति । भोगाश्चत द्देहगताः प्रभुंजतइत्यत्रेत्यर्थः । यथेष्टतोनिर्गत्यादिरादिपदार्थः । ननुलयेविपरीतक्रमश्चेत्मुक्तावपितथाभाव्यमित्येतत्कुतःत थात्वेमनुष्याणामपितथास्यादितिभावेनशंकितस्यकिमुत्तरमित्यतआह ॥ देहहानीति ॥ अतएवेति । सुरलयरूपामुक्तिरे वलयाविशिष्टेत्यभिमतत्वादेवेत्यर्थः ॥ उपसंख्येयमिति । वक्तव्यमित्यर्थः यमित्यस्यान्वयमाह । सइति । सभोगो विशेषेणेत्यर्थः । सर्वदेत्येतत्संसारइतिभ्रमनिरासायाह ॥ मोक्षानंतरमपिसर्वदेति ॥ एतदिति । मुक्तौसदा बिंबवशत्वकथनं अतएवचानन्याधिपतिरित्येतद्व्याख्यानेअनन्यभृत्यत्वमिहोदितेभ्यइत्यादावुत्तरत्रोपयोगीत्यर्थः । यत्त च्छब्दाध्याहारेणान्वयमाह ॥ यद्यस्मान्मुक्ताविति । नियतइत्यस्यार्थः । प्रमाणसिद्धइति ॥ तानिचेति । प्रमाणानिअन्यत्रतात्पर्यनिर्णये ॥ उक्तमिति । सृष्टिक्रमतोविपरीतक्रमोलयइत्युक्तंयुक्तमित्यर्थः । श्रियमाप्येत्येतस्या र्थः । तत्रविलीनोभूत्वेति । व्यवहितपदयोरन्वयेनानुवादोविष्णुमाप्तइति । अग्रेइत्यनुवादः । सर्वेभ्यः पूर्वमितिव्या ख्या । ततोविष्णोरित्यपिव्याख्येयव्याख्यानभावेनज्ञेयं । यदुक्तमित्यादिना कृतशंकोद्धारप्रकारमाह ॥ इदंमुक्तमिति । यद्वामूलेपुनर्जननाद्युक्तेः कृत्यंव्यनक्ति ॥ इदमुक्तमिति ॥ प्राणशब्दस्येति । प्राणस्तेजसीतिश्रौतस्येत्यर्थः ॥ भाष्योक्तमि ति । प्राणस्यतेजसिलयोमार्गमात्रमुदाहृतमितिसोध्यक्षइतिसूत्रभाष्योक्तं प्राणशब्दितहिरण्यगर्भस्यतेजः शब्दितश्रियःप्राप्ति मात्रंनतुतत्रदेहलयइत्युक्तंद्रष्टव्यमित्यर्थः ॥ अपवादांतरमिति । वर्णाश्रमाचाररताइत्युक्तापवादापेक्षयापवादांतरमित्य

र्थः ॥ [६५१।१४] तत्रैवेति । लयक्रमोक्तिप्रकरणएवेत्यर्थः । अतएवेत्युक्तंव्यनक्ति ॥ परमश्रुतावनुक्तत्वादिति । अस्यार्थस्यतत्रै वोक्तौउक्तंसमस्तपरमश्रुतौहिप्रोक्तमित्येतदसाधुस्यात् । परमश्रुतौअस्यार्थस्याभावात् अतोत्रव्यवधानेनोक्तमित्यर्थः । शेषस्यो पयोगमाह ॥ पादार्थमिति ॥ ६ ॥ ४ । २ । ७ ॥ ६ ॥ इतिश्रीमन्न्यायसुधापरिमळेराघवेंद्रयतिकृतेचतुर्थाध्यायस्यद्विती यःपादःसंपूर्णः ॥

॥ इतिश्रीमन्न्यायसुधापरिमळेचतुर्थाध्यायस्यद्वितीयःपादः ॥

॥ अथ श्रीमन्न्यायसुधापरिमळेचतुर्थाध्यायस्यतृतीयःपादः ॥

परिमळ० श्रीगुरुभ्योनमः ॥ हरिःॐ ॥ [६५३।७] प्राक्प्रसंगाद्विवृतमपीति । देवानांमोक्षउत्क्रांतिश्चास्मिन्पादउच्यतेइतिद्वितीयपादीयभाष्य अ.४पा.३
॥२९॥ विवरणप्रसंगात् उत्क्रांतिमार्गौदेवानांनप्रायेणभविष्यतइत्यनेनविवृतमपीत्यर्थः ॥छ॥ सुक्रमेत्यादेर्मूलस्थस्यायंसंबंधः । अर्चिरा अधि.६
दिनातत्प्रथितेः सुक्रमः पूर्वमतस्ययुक्तिः विशेषसंप्राप्तिःसिद्धांतस्य ॥ वायुशब्दादविशेषविशेषाभ्यां सुक्रमः विशेषसंप्राप्तिः ॥
तटितोधिवरुणः सुक्रमः विशेषसंप्राप्तिः ॥ आतिवाहिकस्तल्लिंगात् सुक्रमः विशेषसंप्राप्तिः । वैद्युतेनैवततस्तच्छ्रुतेः । विक्रमः
उरुत्वं कार्यंबादरिः । सांतानिक प्राप्तिः अभीष्टताच सौकर्यमितिपूर्वपक्षयुक्तयः । आप्तिः क्रमानुरागः कथितानुवृत्तिरिति
सिद्धांतस्य ॥ पूर्वत्रतर्कोइतिश्रवणादत्रापितथैवेतिभावेनाह ॥ [६५३।८] तर्कोइतिशेषइति ॥ छ ॥ अप्रतीकालंबनान्नयति ॥
मनः [६५३।६] प्रभृतीनामिति । मनोब्रह्मेत्युपासीतेत्यादिश्रुत्युक्तानांमनःप्रभृतीनामित्यर्थः । तइत्यनुवादः । प्रतीकालंबनाइतिव्या
ख्या । पुरतइत्यस्यार्थः । प्राक्प्रलयकालादिति । विष्णुंप्राप्स्यतीत्यत्रकदेत्याकांक्षायामाह ॥ [६५३।८] प्रलयइति ॥ विष्णुं [६५३।१०] प्राप्यां
पीति । वैकुंठेअमुक्तस्थानगतंविष्णुंप्राप्यापीत्यर्थः । अपिपदस्यप्राप्यापीत्यन्वयइतिभावः ॥ छ ॥ ४ । ३ । ६ ॥ छ ॥ इ ॥४९२॥
तिश्रीमन्न्यायसुधापरिमळेराघवेंद्रयतिकृतेचतुर्थाध्यायस्यतृतीयःपादः ॥ ४ । ३ ॥ छ ॥

॥ अथश्रीमन्न्यायसुधापरिमळेचतुर्थाध्यायस्यचतुर्थःपादः ॥

१०८३

श्रीगुरुभ्योनमः ॥ हरिः ॐ ॥ प्रसिद्धेवेति । कर्मक्षयस्तथोत्क्रांतिर्मार्गोभोगइतिप्रागुक्तदिशेतिभावः ॥ ७ ॥ अतिक्रमे
त्यादिमूलपदानामयंसंबंधः ॥ संपद्याविहायस्वेनशब्दात् अतिक्रमोक्तिःपूर्वपक्षस्ययुक्तिः सामान्यरूपंसिद्धांतस्य मुक्तः
प्रतिज्ञानात् कृतिः प्रतिभानं ॥ आत्माप्रकरणात् अर्थलाभः उक्तिः ॥ अविभागेनदृष्टत्वात् परागतिः आ
श्चर्यता ॥ ब्राह्मेणजैमनिः परागतिः आकृत्रिमता ॥ संकल्पादेवच तदोक्तः अस्तदोषः ॥ अतएवचानन्याधिपतिः त
दोक्तः अस्तदोषः ॥ अभावंबादरिः समस्तकार्य विशेषक्लृप्तिः ॥ जगद्व्यापारवर्जं समस्तकार्य विशेषक्लृप्तिः ॥ स्थितमाहदर्श
यतश्चैवं शिता कृतनिश्चयः ॥ अनावृत्तिश्शब्दात् विश्वसंभावना माहात्म्यं ॥ युक्तयइतिपूर्वत्रश्रवणात्तदनुवृत्तिमत्वाह ॥
सुनिर्णयार्थाइति ॥ ७ ॥ अतएवचानन्याधिपतिः । विद्वान्ब्रह्मज्ञानीयत्तच्छब्दाध्याहारेणयोजयति ॥ तदन
न्येति । उदितेभ्यइत्यनुवादः यइत्यादिव्याख्या ॥ हरेरिति । यत्पतित्वमित्यन्वयः । कस्यपतित्वमित्यतआह ॥
अमृतत्वस्योतेति । मुक्तवर्गस्यापीत्यर्थः । मूलेअर्थानुवादइतिभावेनतद्वाक्यमाह ॥ उतामृतत्वस्येति । मुक्तवर्गस्या
पीशानइत्यर्थः ॥ प्रमाणसमुच्चयइति । उदाहृतश्रुतेस्समुच्चयइत्यर्थः ॥ विशेषार्थइति । संसारिरूपपुंविशेषग्रहणार्थमि
त्यर्थः ॥ परकीयेति । नास्यान्योधिपतिर्भवतीत्यर्थइतिपरेणव्याख्यानादितिभावः ॥ मूलंप्रकृताविति । देहेंद्रिया
दिबंधहीनत्वरूपमुक्तत्वहेतोः वंध्यसंकल्पत्वाभावस्यवा परमतेधर्माणांजडगतत्वेनअवंध्यसंकल्पत्वस्यैववातत्रसत्त्वादितिभा

वः । अपिपदान्वयेनानुवादोब्रह्मपुरस्सराणामपिमुक्ताविति । मुक्तेत्युक्तिकृत्यमाह ॥ [६५४।२] अमुक्तानिति ॥ (तथा)यथाहेति । अत्रैवपादे ॥ विकारेति ।· विकारं संसारं आवर्तयतीतिविकारावर्ति तद्विषयंव्यापरणंमुक्तानांनास्ति । चशब्दोन ञनुकर्षणार्थः । इमंमानवमावर्तनावर्ततइतितथादर्शयति इति तथाहिदर्शयतीतिसूत्रेशेषस्यार्थः ॥ [६५४।३] इत्यस्युक्तमिति । मुक्तस्वकीयावरनियंतृतेत्युक्तमित्यर्थः ॥ अनेनेति । मुक्तस्वावरनियंतृताकथनेन आप्नोतिस्वाराज्यं सर्वेस्मैदेवाबलिमावहंति तेषां सर्वेषुलोकेषुकामचारोभवतीत्यादिश्रुतीनांजगद्व्यापारेतिप्रधानसूत्रेपरभाष्योदाहृतानांमुक्तस्वकीयावरनियामकविषयत्वेनगतिश्चोक्ताभवतीत्यर्थः ॥ कुतएतदिति मुक्तस्वकीयावरनियंतृत्वंकुतोमानाज्ज्ञेयमित्यर्थः । मूलपदानामर्थयोजनांचाह ॥ अनेनचक्षुरंतस्थेनेत्यादिना । मूलेअनेनामुनेत्युक्तिक्रमानुरोधेन परार्वाक्तनलोकिनामित्यपियथाक्रममन्वेतीतिभ्रमनिरासायाह ॥ [६५४।५] अत्रेति । मूलइत्यर्थः ज्ञानिपरत्वज्ञापनायोक्तं इत्याद्यामिति । अस्यइतिश्रुतिमितिवक्ष्यमाणेनान्वयः ॥ [६५४।६] इतिश्रुतिमिति । प्रथमाध्यायस्थछंदोगश्रुतिमित्यर्थः । असंकुचितंलोकाधिपत्यमितिभ्रमनिरासायाह ॥ [६५४।१०] इत्युक्तमनुसंधेयमिति ॥ साचान्यत्रेति । मुक्तानांनजगद्यत्नस्तथापिविबुधाःसदा । मुक्तानांतुनियंतारःतेषांब्रह्मास्यवैहरिरितिन्यायविवरणेद्रष्टव्येत्येके ॥ वक्ष्यमाणेति । नचेहविज्ञानफलंसमुक्तमित्यादिनावक्ष्यमाणेशधर्मत्वादिरूपयुक्तिसमुच्चयार्थइत्यर्थः ॥ [६५४।१२] उक्तेति । तुरश्रुतेरेवेत्यर्थः ॥ निवारितत्वा[६५४।१३]दिति । मुक्तस्वकीयावरयंतृतेतिमूलकृताविकारावर्तिचेतिसूत्रकृताचेतिभावः ॥

इत्युक्तआ(सइति)सेति । अनेनदेवेनेत्यत्रसुधायामुदाहृतछंदोगश्रुत्युक्तलोकाप्तिमानित्यर्थः । मूलंयोजयति ॥ इहश्रुताविं
ति ॥ आ(सइति)सेति । लोकाप्ति(मानित्य)मंतइत्यर्थः ॥ वृत्तिविशेषेति । लक्षणावृत्तेर्मुख्यवृत्तेर्वाद्योतकः ॥ स्फुटएवे
ति । आधाराधेयभावरूपोव्यक्तएवेत्यर्थः ॥ तद्विविक्षालोकस्थजनविवक्षा ॥ नतावतापीति । लोकाविवक्षयापीत्यर्थः ॥ आ
प्तिरेवेति । लोकप्राप्तिरेवेत्यर्थः । इहेतिव्याख्येयानुवादः ॥ एतत्सिद्धमिति । लोकस्थमुक्तनियंतृत्वंसिद्धमित्यर्थः ॥ एतेने
ति । व्याख्यानरूपश्रुतिकथनेन । लक्षणापक्षेसाधकीभूतमितिशेषः । मुख्येलोकपदस्यलोकरूपेर्थेपैंगिश्रुतिविरोधरूपबाधकं
चोक्तं । नकेवलंतत्स्थत्वरूपसंबंधाख्यंलक्षणाबीजमितिचार्थः ॥ भूतपूर्वगत्येति । मुक्तेःपूर्वंलोकाभिमानित्वंभूतमितिइदानी
मपिलोकशब्देनगृह्यंते । भ्रष्टाधिकारेपिलोकेघट्टाधिकार्ययमितिव्यवहारदर्शनादितिभावः ॥ प्रकारांतरेणेति । दर्शयन्नि
त्यन्वयः ॥ लोकतेरिति । लोकृदर्शनइत्यतोनंदिग्रहिपचादिभ्योल्युणिन्यचइतिअच्प्रत्ययेलोकइतिरूपमित्यर्थः । ननुदर्श
नार्थकशब्दस्यकथंप्रकाशार्थत्वमित्यतआह ॥ दर्शनमिति ॥ मोक्तमिति । माविस्मार्षीरितिमाङोन्वयः । लोकाधिपत्यंच
विधातुरेवेत्यादिनोक्तमित्यर्थः ॥ स्वमतेनश्रुतिंव्याख्यायेति । मुक्तब्रह्मणःपरार्वाक्तनलोकमानिनातेनसहमुक्तान्प्रतिनियंतृ
त्वपरेयंश्रुतिरितिव्याख्यायेत्यर्थः । अमुष्मात्सूर्यमंडलादित्यर्थः । परांचउपरितनाः ॥ अक्षिगतमिति । प्रकृतेत्यनुषंगः ॥
नित्यत्वेति । एषनित्योमहिमाब्राह्मणस्येत्येवमवगमादित्यर्थः । श्रुतीनामनादिनित्यतयासर्वदाभगवन्महिमप्रतिपादनात्त

त्प्रतिपादितैश्वर्यंनित्यमितिभावेनसमस्तश्रुत्यादावित्युक्तं । सर्वत्रनित्यपदाश्रवणादाह ॥ किंचेति ॥ सर्वपापक्षयेति । उदे
तिहवैसर्वेभ्यःपाप्मभ्यइत्युक्तस्यमुक्तलिंगतयोपासकेअयोगादितिभावः ॥ अतएवेति । लिंगविरोधादेवेत्यर्थः ॥ सर्वाशुभे
ति । एतच्चसर्वाशुभनाशलिंगादितिपूर्ववाक्येपापनाशलिंगादित्यनुक्त्वासर्वाशुभेत्युक्त्याप्रकृत्यादिबंधनाशस्यविविक्षितत्वंज्ञा
यतइतिभावः । पाप्मभ्यइत्येवश्रवणात्कथंप्रकृत्यादिबंधविमुक्तत्वंव्याख्यायतइत्यतःप्रकरणबलादित्याह ॥ तस्योदितिना
मेतीति ॥ क्रियाविशेषणमिति । अमुनेत्यादियथाभवतितथाभेदश्चेत्यर्थः । चशब्दान्वयेनानुवादोभेदश्चेति । शंकते ॥
भवेदिति । अमुनारूपेणेत्यनुवादः । अमुष्यतादात्म्यमाप्येत्यर्थोक्तिः । एवमग्रेपि ॥ प्रत्ययांतरेति । तत्प्रत्ययेत्यर्थः ॥ रूपेणे
तिपदस्येति । समुच्चयार्थइत्यनुकर्षः । रूपेणेतिपदमपिअतिहायेत्यर्थकतयापिशब्दस्यसमुच्चयार्थइत्यर्थः । ल्यबन्वयघटनाय
क्रितांतरमाह ॥ प्रवृत्तायामिति । इहेत्यनुवादः श्रुतावितिव्याख्या । अस्फुटत्वान्निष्कृष्यस्वयमर्थंव्यनक्ति ॥ भवेदेवमिति ।
ननुपरागर्वाक्तनलोकाधिपत्यरूपभगवद्धर्मप्राप्त्यर्थमेतावान्शब्दःप्रयुक्तइत्यतआह ॥ तादात्म्यप्राप्ताविति । ऐश्वर्या
संभवंव्यनक्ति ॥ नचैतद्भूयमिति । तत्तादात्म्यंप्राप्तस्येत्यर्थः ॥ उक्तार्थमेवेति । स्वावराधिपतिरहिताःकिंतूत्तमा
धिराधिपतिमंतइत्युक्तार्थंनतुसर्वात्मनाधिपतिशून्याइतिपरोक्तार्थमित्यर्थः । अजशब्दस्तत्प्रसादलक्षकइतिभावेनाह ॥ त
त्प्रसादादितिवेति । मूलोपात्तपुरुषोत्तमविशेषणत्रयस्यनमोनमइतिद्विरुक्तेश्चकृत्यंवदन्नवतारयति ॥ स्वप्रतिपा

दितप्रकारमित्यादिना । बहुव्रीहिरयं । प्रकाराःशुभधर्माः । अतिशुद्धेत्यस्यार्थअतिविशदेति ॥ [६५६।९] निरुपाधिके
ति । मोक्षादिफलांतरोपाधिहीनेत्यर्थः ॥ [६५६।१०] अंतएवेति । दानस्यदययास्वाभाविकत्वादेवेत्यर्थः ॥ ताच्छीलि
कस्यतृनइति । आक्केस्ताच्छीलतद्धर्मतत्साधुकारिष्वितितृतीयाध्यायद्वितीयपादस्थपूर्वसूत्रप्रकृतताच्छील्यार्थेतृन्नि
तिसूत्रेणतृनोविधानादितिभावः । आद्यांत्यविशेषणयोःपौनरुक्त्यशंकायामाह ॥ सद्गुणानुवादेनेति ॥ तादात्म्यंचे
ति । आत्मेतिपदेनेतिभावः ॥ ६ ॥ ४ । ४ । ७ ॥ ६ ॥ व्यवधानादन्वयेनानुवादोयस्यवायोर्देवस्येति ॥ [६५६।१५] अंतच्प्रत्य
यइति । उणादयोबहुलमितिसूत्रादितिभावः । तथाचपुगंतेतिगुणेदर्शतमितिरूपमित्यर्थः ॥ अनेनेति । बद्रूदर्शतेति
कथनेनेत्यर्थः ॥ गत्यर्थइति । अयपयगताविति धातुपाठादितिभावः ॥ ततउणिति । अयधातोरौणादिकेउण्प्रत्ययेअ
तउपधायाइतिवृद्धावायुरितिरूपं । तस्यवशब्देनकर्मधारयइत्याह ॥ वश्चासाविति ॥ [६५६।१६] किंचेति । मूलरूपंबलात्म
कंज्ञानरूपंचेत्येतावदेवनकिंतुगुणांतरयुक्तंचेत्यर्थः । तदाह ॥ भर्गइति ॥ असुन्प्रत्ययोडिच्चेति । डित्वात्गमे
ष्टिलोपः भृञोऽकारोंतादेशइतिभावः ॥ [६५६।१७] कृवापाजीतिउणादिसूत्रं । डुकृञ्करणे । वागतिगंधनयोः । पापाने । ॥४९५॥
जिजये । डुमिञ्प्रक्षेपे । स्वदिआस्वादने । साधसंसिद्धौ । अशुव्याप्तौ । एभ्योधातुभ्यउण्प्रत्ययोभवतीत्युण्प्रत्ययेआतोयुक्
चिण्कृतोरितियुगागमेवायुरितिरूपसिद्धेरितिभावः ॥ वातिरिति । वाधातुरित्यर्थः ॥ अपिचेति । गुणांतरोपेतंचत

द्रूपमित्यर्थः । इदमपिवायुशब्दव्याख्यानमितिभावेनतदारूढंदर्शयति ॥ [६५६।१८] वयश्रेष्ठत्वेइति । वय्इत्यस्मादुणिउपधावृद्धौवायु
रितिसिद्धेरितिभावः॥ इत्थमेवेति । उक्तगुणविशिष्टमित्यर्थः॥ नयशब्दस्यनेतृत्वमर्थइतिभावेनव्युत्पत्तिमाह॥ [६५६।१९] नीयंतइति ॥
शिष्येष्विवतियोग्यतयान्वेति ॥ अनेनेति । रूपेणेत्यर्थः ॥ एरजितीति । इवर्णांताद्धातोरच्प्रत्ययोभवतीतिणीञ्प्रा
पणेइत्यतोऽच्प्रत्ययेसार्वधातुकार्धधातुकयोरितिगुणेअयादेशेनयेतिरूपसिद्धेरितिभावः ॥ [६५६।२०] आतोनुपसर्गेइति । अनुपस
र्गेसुप्युपपदेधातोःकप्रत्ययोभवतीतिऐकारांतात्क्षैक्षयइतिधातोःकप्रत्ययेआदेचउपदेशेऽशितिइतिधात्वैकारस्यआत्वेआतोलो
पइटिचेतितस्यलोपेपृदित्यत्रतकारलोपेचपृक्षइतिसिद्धेरितिभावः । नचैवंवपुर्विशेषणत्वात्पृक्षमितिभाव्यमित्यतआह ॥ छां
दसःपुल्लिंगइति । पृक्षोवपुरितिश्रुतौछांदसपुल्लिंगत्वेनतदनुकरणत्वेनात्रापिपुल्लिंगइतिभावः। यद्वाछांदसइतिपूर्वेणान्वेति ।न
न्वसुन्प्रत्ययेकथमादेचउपदेशेशितीतिएकारस्यप्राप्तात्वलोपइत्यतआह॥ [६५६।२१] किदिति।तथाचातोलोपइटिचेतिआकारलोपइतिभा
वः। मध्वइति । मध्वाभिधमित्यर्थः। तत्पदंनिर्वक्ति । मधुशब्दइत्यादिना ॥ [६५६।२२] मधुद्यौरिति । द्यौर्द्युलोकदेवतानोऽस्माकंपिता
अतःमधु सुखदास्त्वित्यर्थः ॥ तीर्थवाचीति । कथमित्यतोऽवयवार्थमाह॥ वातेरिति । वागतिगंधनयोरितिधातोरित्यर्थः ॥
घञर्थइति । सचभावेअकर्तरिचकारकेपिविहितइतितदर्थइत्यर्थः । कप्रत्ययेआतोलोपेवेतिरूपसिद्धेरितिभावः ॥ [६५६।२३] अस्येती
ति ।मध्वइतिपूर्वेणान्वयः । नन्वेवंमधुवइतिभाव्यमित्यतआह ॥ स्वरित्यत्रेवेति । सुवरितिवक्तव्येउकारलोपेनस्वरितिपठंतिब

हृचाःतथेहापिमधुशब्दोकारलोपइत्यर्थः । भूतिपदस्यानेकार्थत्वाद्विविवक्षितमर्थमाह ॥ भूतिर्महा[६५६।२४]लक्ष्मीरिरिति । कृतंव्याख्यानंस्वामिनेसमर्पयति ॥ वचनेति । यथाहिलोकेभिक्षुकःतत्रतत्रोद्यानेषुपुष्पाण्याहृत्यमालांकृत्वासमर्पयेच्चेत्तांयथादयालुहृदयेबिभर्तिएवंवचनप्रसूनमालांमयासमर्पितांहृदयेदययाध्रियतांइयंसाध्वीत्यंगीक्रियतामित्यर्थः । कमलालक्ष्मीर्महिलाभार्यायस्येतिसतथातेनेत्यर्थः । मालाहिप्रमदायुक्तस्यैवहृदयंगमेतिकमलामहिलेनेत्युक्तं ॥ [६५६।२५]श्रद्धाजाड्यादिति । भक्तिपारवश्यादित्यर्थः । अकृषिकृतवानस्मि । एतस्मात्स्खलनदोषान्नहिनिंद्योस्मिकिंतुमान्यएवभवामीत्यर्थः । भौमैःभूमिगतैःविबुधैःभूसुरैःब्रह्माणैरित्यर्थः ॥ १ ॥ सर्वेंद्रियप्रेरकेणश्रीप्राणपतिनेरितः । यदवोचमहंतेनप्री(णातु)यतांकमलालयः ॥ येतुन्यायसुधापानकामुकारसिकाबुधाः । आघ्रायेमंपरिमळंसेवंतांतेसुधामिमां(तेतामिमांसुधां) ॥ ज्ञानाब्धिरप्यवादीद्यत्स्खलत्त्वंस्वात्मनस्तदा । मादृशानांस्खलत्त्वंकिंवाच्यंक्षाम्यंतुतद्बुधाः ॥ इतिश्रीमन्न्यायसुधापरिमळेसुधींद्रगुरुपादशिष्यराघवेंद्रयतिकृतेचतुर्थाध्यायस्यचतुर्थःपादःसंपूर्णः ॥ १ ॥ ४ । ४ ॥ १ ॥ श्रीलक्ष्मीहयग्रीवार्पणमस्तु ॥ १ ॥

"अयं (न्यायसुधाटिप्पणी)परिमळः धर्मशास्त्रिणा अपशंकररामाचार्येण टोणपेरामाचार्यसूनुना कृष्णाचार्येण च हवाईवासुदेवाचार्यप्रभृतिभिर्बहुभिः पंडितैश्च संशोध्य मुंबय्यां "निर्णयसागरमुद्रणालये" मुद्रयित्वा प्रकाशितः"

॥ इति श्रीमन्न्यायसुधापरिमळसंपूर्णः ॥